कर॰ महा॰ ॥श्री गणेशायनमः॥ श्रीमहागणपतेयेनमः॥श्रीमहालक्ष्मैनमः॥वंदेकरींद्रवदनंसकलामरेंद्रवृंदानतंसकलविघ्नविनाशदक्षं
१ यन्नम्यवेविधिहरीश्वरचंद्रसुरव्यादिवालभंतिसकलेप्सितवृंदराशिं॥१॥शारदांसकलवाक्प्रवृत्तिदांसुंदरीसकलकल्मषहंत्री॥सन्न
मेसकलमंगलदात्रींहंसमेवाहनदृढीकृतासनां॥२॥देवेनयवृंदसुरवृंदकिरीटकोटिज्योतिकृटानिकरकल्पितरत्नदीपं॥देवित्व
दीयचरणंशरणंजनानांसेवामहेसकलमंगलवर्धनाय॥३॥भूमिसंस्थितमपीहनेवभूयंदिवौक्षेल्पिदिवतोप्यधरस्थं॥नसा
पाज्जगद्घोद्यहारणादविमुक्तंकरवीरकंपुरं॥४॥सेवंतुरेभुविजनाःकरवीरदिव्यधेनुप्रभूकथनामृतमृत्युदारं॥येद्बेभवाद्धिग
दनाशकरंपवित्रंपापापहंसकलमंगलवृद्धिदंतत्॥५॥तंवेदशास्त्रपरिनिष्टितशुद्धबुद्धिंचर्मांबरंसुरमुनींद्ररतंकवींद्रं॥कृष्णत्वचं
कनकपिंगजटाकलापंव्यासंनमामिशिरसातिलकंमुनीनां॥६॥अष्टादशपुराणानांकर्तासत्यवतीसुतः॥कलिंसमागतंवीक्ष्यज
नंदृष्ट्वाजरंमुनिः॥७॥कृत्वावेदंचतुर्भागंचतुर्भिःसमपाठयत्॥प्रत्येकमपिशाखांवैविधिवत्समपाठयत्॥इतिहासपुराणांवैपंचमंवे
दमेवच॥जितेंद्रियायधर्मात्मायदांतायसत्यवादिने॥सुतायकथयामाससर्वपापप्रणाशनं॥व्यासउवाच॥निमेषेनेमिषारण्येवना १
नाद्रुमविभूषिते॥नानादेववराकीर्णेनानातीर्थनिषेविते॥९॥यक्षगंधर्वकिन्नरविद्याधरविभूषिते॥नानादेववराकीर्णेयजंतः

श्चउद्यान्वितः॥नरनारायणस्याग्रेतस्मिन्वनवरेसदा॥निवसंतिमुनिश्रेष्ठाःपरध्यानपरायणाः॥१३॥कश्यपोगालवोगार्ग्योगौ
तमश्चांगिरास्तथा॥याज्ञवल्क्योवसिष्ठश्चभृगुःकुत्सस्तथैवच॥१४॥विश्वामित्रस्तथात्रिश्चधनंजयविभावसू॥मांडव्यश्चाथदूर्वा
साजमदग्निस्तथैवच॥१५॥आपस्तंबोथजाबालिःकपिलश्चवनस्तथा॥मुद्गलश्चकपिश्चैवजलंधोवीतिहोत्रकः॥वामदेवागस्त्य
मदोत्यघमर्षणएववा॥पावमान्यःप्रगाथाश्चित्रांरवश्चसोभरिःस्तथा॥अष्टाशीतिसहस्रेस्तुसमेताःसर्वएवहि॥इत्येतेसंयतात्मा
नोमुनयःशौनकादयः॥बदरीवनसंस्थानाःसूतंपप्रच्छुरादृताः॥१९॥ऋषयऊचुः॥सूतजीवचिरंसाधोयद्भवान्श्रवणामृतं॥
कथनंसर्वशास्त्राणांप्रकरोषिबहुश्रुत॥२०॥श्रुत्वापिसर्वतीर्थानांभुवनत्रयवासिनां॥नानास्थानप्रसिद्धानीमहात्म्यंनमनं
स्थिरं॥महात्म्यश्रवणात्तेषांसंशयोबहुजायते॥२१॥नद्दृष्टव्यमिदंवेत्तिसंशयाद्भ्रमतेमतिः॥अधुनेहमहाभागनादृशंब्रूहिनःप्र
भो॥क्षेत्रंतीर्थवराकीर्णमिहामुत्रफलप्रदं॥२३॥पुष्कराद्यानितीर्थानिगंगाद्याःसरितस्तथा॥प्रयागंचगयावापिनैमिषारण्यमेव
वा॥२४॥विरजंसेतुबंधंचकृष्णवेणीचगोमती॥द्वारकागोकुलंचापिश्रीशैलंपांडुरंगकं॥२५॥वाराणसीमहापुण्याचंद्रभागासरस्व
त्या॥इत्यादिसर्वतीर्थानिक्षेत्रेयस्मिन्वसंतिहि॥२६॥तादृशंतीर्थमेकंहिब्रूहिसंशयनाशनं॥यद्वास्यामःसुखिनःस्यामसर्वतीर्थनिवासिनः॥

कर॰ माहा॰ मनोवै निश्चलं कृत्वा सर्वतीर्थफलाकुलं ॥ सूत उवाच ॥ अहो मे भाग्यमतुलं वेदशास्त्रविदामहं ॥ २८ ॥ भवतां प्रश्नतीर्थेन पूतोहं सर्वकर्मसु ।
२ वाराणस्यधिकं क्षेत्रं करवीरपुरं महत् ॥ २९ ॥ नत्वा व्यासमभ्यमुनयेव दिष्यैतत्कथानकं ॥ यन्नित्यं त्रिजगत्पवित्रविलसत्सत्तीर्थवृंदाततं । श्री
मद्भक्तिधरस्य हि विभोर्विष्णोर्निवासालयं ॥ यं इंद्रोपेंद्रमुनींद्रवृंदनिकरैः संसेवितं सर्वदा तत्क्षेत्रं करवीरकं पुरवरं पायादपायाच्चिरं ॥ यत्रा
स्ते दिव्यलक्ष्मीर्विविधगुणवती बिभ्रती पानपात्रं सव्ये ज्ञानसुधायुतं गदहरं मातुलिंगं करन्ये ॥ भक्तान्संवदती वरे शिशुवराः संसारन
ष्टाश्चिरं पानं कुर्वंतु चेदकद्रुयदि हि भवेन्नहि दास्यि फलं वः ॥ यत्रास्ति सर्वमाता त्रिभुवनभयहरा व्यातखेटादिभूषा पापं संप्रहिणोति भुविन्ट
यां संदर्शनात्तापिनां ॥ यत्राधिश्वश्वशु पिंडा न हि भवति तथा कालभर्तुश्च पीडा तत्सेव्यं करवीरकं पुरवरं क्षेत्रं महान्मात्रकं ॥ यत्संचारा द्वितया
ष्टकाधिकमहाकल्पप्रभूतं चिरं सेव्यं नामविभूषितं सुखकरं या क्यायुतेत्वाद्यया ॥ तावद्भिर्मुख्यलिंगैप्रतिलमधियुतैर्भूषितं तत्पवित्रं तत्से
व्यं करवीरमक्षयफलं कोल्हापुरं सर्वदा ॥ विघ्नान्कुर्वंति सर्वे प्रथितसुरवराश्चैर्ष्ययादत्यमान्नागच्छंत्येते विमूढाः स्वपरपरतोदप्युद्भमत्रास्ति
तायेः ॥ एवं संचिंत्य नूनं विविधमृगतृष्णाभयाव लान्अन्यत्रोत्सृज्य नित्यं प्रमुदितहृदयावृक्षरूपावसंति ॥ यत्रस्थावेनरपशुमृगायांतिलो २
कं विकुंठं भोगान्भुक्त्वा सपदि परिचितां नैहिकामुष्मिकादीच्छा ॥ तद्दृक्षेत्रं प्रभजत जनाः सर्वतृष्णास्यदं यन्तत्यज्यं भुवि मुक्तिदं लवलवार्ध

वापि कोल्हापुरं ॥ पुत्रोवै पुत्रभावं न खलु समायां त्यदलान्न पिंडं सेयं रुद्रप्रभूतविभवां रोद्रीगया विश्रुता ॥ जंबूद्वीपशिरोविभूषणक
री कोल्हापुराख्या पुरी संसेवा त्रयवाधिकान रवैरे वाराणसी दक्षिणा ॥ आशास्वष्टसु सर्वरक्षकतयातिष्ठंति दिव्यानि वै लिंगान्यष्टमहोज्वला
नि मुनिभिः संसेविता निक्रमात् ॥ तत्क्षेत्रं मृतमुक्तिदं स्थितजनानंदप्रदं सर्वदा सेव्यं गेयमभीक्ष्णशः प्रतिदिनं कोल्हापुरं पूर्वरं ॥ यस्मिन्क्षेत्रे
विलसति चतुर्द्वारतो नंतशायी लक्ष्मीकांतस्वपिति हि जलेसर्वरक्षात्तचक्षः ॥ तद्दृक्षेत्रं प्रभजत सदा सर्वतीर्थादिभूतं सेव्यं रुद्रेंद्रचंद्रप्रमुख
सुखकेरे सर्वतीर्थास्पदं यत् ॥ क्षेत्रस्मिन्प्रथिता विभाति नगरी द्वारावती गोमतीजीवंत्या सहसंगता जनितरां ब्रह्मादिभिः सेव्यते ॥ तत्को
ल्हापुरमत्रवै त्रिभुवने क्षेत्रं महच्छोभते किं वर्ण्यं निवसंति ये त्र सुचिरं तेषामनंतं फलं ॥ रामेश्वरो निवसंते किलसेतुबंधे यद्दर्शनं महदघौघ
हरं हि यत्र ॥ किंतादृशेषु विभवत्प्रथितं पुराणं क्षेत्रं विना करवीरपुरं हि नान्यत् ॥ मल्लिकार्जुनशिवोपि यत्रवै श्रीलशृंगमधिरुह्य विभाति ॥
तत्क्षेत्रं प्रभजता करवीरं सुंदरं सकततीर्थनिकायैः ॥ विराजते यत्र तथा प्रयागं महावटाक्रांतमुनींद्रहृद्यं ॥ तत्तीर्थवर्यं करवीरसंज्ञं संवर्णनीयं प
रमं पवित्रं ॥ विष्णोर्गयाऽत्रापि विराजते त्र विशालतीर्थः स्थितहाटकेशः ॥ कोल्हापुरं तीर्थमतीव पुण्यं जगत्त्रयेनेन समं न चान्यत् ॥ बादरंव
वनमपीह राजते क्षेत्रपश्चिमविभागतो महत् ॥ योजनत्रयसमंततेरणतत्करवीरं महदघौघनाशनं ॥ विरजं विरजं हि भासते यत्र मुकुलमु

नीश्वर युक्तं॥ करवीरं सकलार्थिनत्प्रदं संसेव्यं स्वहितेच्छुभिश्चिरं॥ गोकुलं सकलगोपकदंबैः संयुतं सकलमंगलदातृ॥ शोभते करवीरपुरे
स्मिन्नत्यंजेत्तदतोप्यधिपुण्यं॥ यत्रास्ते पांडुरंगो विधृतकटिकरः क्षेत्रनैरृत्यभागे द्वारे वै पौंडरीके प्रमुदितहृदयः सेव्यये वास्य पित्रोः॥ द्वात्रिं
श द्युगसंभवे पुरवरे नंदापुराख्ये पुरे तत्क्षेत्रं भजतामभीष्टफलदं कोल्हापुरं वैष्णवी॥ यस्मिन्क्षेत्रे विलसति महाभैरवो रंकनाथो देव्याया
विहितो विदुष्टदमने रक्षणे सज्जनानां॥ सेव्यं तत्करवीरकं पुरवरं वंद्यं सदा सर्वदा स्त्रीस्तृणामभयप्रदं शुचिकरं पापापहं सेवनात्॥ उज्वलो
वा स्थिता यत्र द्वारे पूर्वे महाशुभे॥ कात्यायनी महादेवी दक्षिणा द्वाररक्षिणी॥ पश्चिमद्वारपालस्तु श्रीसिद्धबटुकेश्वरः॥ क्षेत्रस्योत्तरदिग्द्वारे
स्थितो रत्नेश्वरो महान्॥ क्षेत्रस्य पूर्वदिग्भागे त्र्यंबुली यत्र तिष्ठति॥ देव्या दत्तवरो दर्की ह्लोकयात्राफलप्रदा॥ दर्शनं ये न कुर्वंति तेषां पुण्यापहारिणी॥ वार्षिकादर्शनाद्यावैस्त्रायिनां दीयते फलं॥ पक्षत्रयनिवास्यत्र पुनात्यासप्तमं कुलं॥ महाकल्यहृतं पापं संप्राप्य करवीरकं॥ क्षणाद्विली
यते नित्यं किंचित्रं स्नानदानतः॥ वीरो महागलो यत्र देत्यदर्पापहारकः॥ श्रीरंकभैरवश्चैवं दैत्यदानवयोः क्रमात्॥ देव्या संस्थापितौ नित्यं दंडपाणी
उभावमू॥ देव्याल्लब्धवरौ तौ हि पूजनात्सर्वकामदौ॥ संतिष्ठतो मुनिश्रेष्ठाः केनेदं वर्ण्यते पुरं॥ एवं तीर्थवराकीर्णं सर्वदेवनिषेवितं॥ सर्वाभीष्टप्रदं ती ३
र्थं त्रिषु लोकेषु नत्कचित्॥ इति पाद्मे महापुराणे करवीरकांडे करवीरमहात्म्ये नारदमार्कंडेयमहामुनिसंवादे प्रथमोध्यायः॥ ॥सूत उवाच॥

॥इममेव पुरा प्रश्नं मार्कंडेयो महामुनिः॥ नारदं परिपप्रच्छ सर्वज्ञं हि घृणानिधिं॥ अधीत्य वेदान्हि विधिवदर्थं विज्ञाय तत्वतः॥ पठित्वा धर्मशास्त्राणि
पुराणान्यधिगम्य च॥ अंगान्यभ्यस्य तर्कांश्च परिलोक्य समंततः॥ मीमांसाद्वयमालोक्य धनुर्वेदं विगाह्य च॥ आयुर्वेदं विचार्याथ नाट्यवेदकृतश्र
मः॥ अर्थशास्त्राण्यनेकानि प्राप्याश्वगजचेष्टितं॥ ४॥ कलासु चकृताभ्यासो मंत्रशास्त्रविचक्षणः॥ भाषाश्च नानादेशानां लिपीर्ज्ञात्वा विदेशजाः॥ ५॥
अर्थानुपार्ज्य धर्मेण भुक्त्वा भोगान्यदृच्छया॥ यौवनं सत्वरं ज्ञात्वा जरां दृष्ट्वा स्थिरं श्रुतां॥ ६॥ चिंतामवाप महतीं मार्कंडेयो महामुनिः॥ पठतो मे गतः काल
स्तथैवार्जयतो धनं ७ मयाधिनो महेशानः कर्मनिर्मूलनक्षमः॥ प्राप्तो हं मानुषं देहं नानायोनीर्विगाह्य च॥ ८॥ स्वर्गापवर्गयोर्द्वारं तिरश्चां पुनरस्य च।
काला हीनाग्रस्यमानं जनं वीक्ष्य शुचान्वितः॥ अजरामरमात्मानं तपसा कर्त्तुमुद्यतः॥ तपोभूमिमचक्षाणः श्चिंतयामास तां मुनिः॥ किं तत्क्षेत्रं भवेदत्र
यत्रोप्यसुमहत्तपः॥ सहस्रधा प्रपद्येत यत्रायुर्दीर्घमाप्नुयां॥ इति चिंतातुरे तस्मिन्नारदः पर्यटन्महीं॥ नारदं परिपप्रच्छ मार्कंडेयो महामुनिः॥ १२॥ मार्कं
डेय उवाच॥ त्रिषु लोकेषु विख्यातं तीर्थं क्षेत्रं च दैवतं॥ येनेतद्धि यतेन्नत्स्यन्तत्तीर्थं ब्रूहि मे मुने १३ अप्याप्यपि च तीर्थानि प्रयागादीनि यत्नतः॥ निवसंति स
मस्तानि क्षेत्रं तद्ब्रूहि नारद १४ इतं दत्तं तथा तप्तं यत्रानंत्याय कल्पते॥ वांछितं लभते मर्त्यो ब्रूहि तद्विस्तरान्मम॥ सूत उवाच॥ इति तत्प्रश्नसंहृष्टो नारदो मु
निसत्तमः॥ क्षणं चिंत्य महायोगी प्रवक्तुमुपचक्रमे १५ नारद उवाच विष्णुनाभिहितं क्षेत्रं मसित्रा पृच्छते मुने॥ तेन यत्कथितं मत्यं ब्राह्मणा पृच्छते पुरा १७

करवी० मा० तदहं संप्रवक्ष्यामि करवीरं महापुरं ॥ नानातीर्थसमायुक्तं नानामुनिगणान्वितं ॥ सिद्धचारणगंधर्वयक्षकिंनरसेवितं ॥ पीठमाद्यं महालक्ष्म्याः सर्वा
४ भीष्टप्रदं नृणां १९ करवीरे जलं शंभुः पाषाणस्तु जनार्दनः ॥ सिकता मुनयः सर्वे तरवः सर्वदेवताः ॥ तिस्रः कोट्यर्धकोट्यस्तु तीर्थानि भुवनत्रये ॥ निवृ
त्तिसंगमं यांति राहुग्रस्ते दिवाकरे ॥ २१ ॥ राहुग्रस्ते शशांके चैव निवृत्त्यां यत्फलं लभेत् ॥ तत्फलं हि मुनिश्रेष्ठ करवीरे दिने दिने ॥ श्मशानश्च खरं क्षेत्रं पुरं पीठं
तथैव च ॥ पंचैतानि न लभ्यंते करवीरपुरं विना २३ आद्यं तु वैष्णवं क्षेत्रं शाक्त्यागमसमन्वितं ॥ भुक्तिमुक्तिप्रदातारं वाराणस्यां यवाधिकं ॥ मार्कंडेय उवा
च ॥ यवाधिकं पुरस्यास्य कथं जातं महामुने ॥ ब्रूहि तत्सकलं पूर्वं विष्णुना निर्मितं मुने ॥ सर्वजीवनिकायानां संसारार्णवतारकं २६ उत्तरं पुण्यपापाभ्यां
दक्षिणेनोत्तरतः क्रमात् ॥ काशिका चोत्तरे भागे करवीरं तु दक्षिणे ॥ शिवरूपेण तत्रास्ति शक्तिरूपेण चात्र हि ॥ तस्मात्पुरद्वयं चेदं वैष्णवं प्रथितं भुवि २८ क
दाचिच्छिवशक्त्योस्तु विवादः समजायत ॥ मत्क्षेत्रं च महत्पूर्वं त्वत्क्षेत्रं वा महत्तरं ॥ एवं विवादतो तत्र शिवशक्त्योरुपागतः ॥ विष्णुः संबोधयामास तु लांध
ताकरे स्वयं ॥ ३० ॥ पुरद्वयं समारोप्य करवीरं च काशिका ॥ उच्चैः कृतप्रणायाथ प्रोवाच जगतां पतिः ॥ अधः किं दृश्यते क्षेत्रं दक्षिणं वा तथोत्तरी ॥ शिवः प्रोवा
च भगवान्मत्क्षेत्रं चोर्ध्वतो महत् ॥ शक्तिः प्रहस्य तत्राह मत्क्षेत्रं भुवि दृश्यते ॥ नानातीर्थसमुद्भूतं गौरवेणापि तन्महत् ॥ शिवः श्यामं सुखं कृत्वा तूष्णीं त ४
स्थौ शुचार्पितः ॥ तुलां संत्यज्य वै विष्णुः शिवशक्त्योः फलप्रदः ॥ ब्रह्मादिदेवतुष्ट्यां सभायामुपविश्य सः ॥ उभयोर्जनयन्हर्षं प्रोवाच जगतां पतिः ॥ विष्णुरु

वाच ॥ शिवशक्त्योः समे क्षेत्रे मयात्र निर्मिते पुरा ॥ तथापि जातं शक्तेर्वै यवमात्रं ततोधिकं ॥ इति विष्णुवचः श्रुत्वा ब्रह्मेंद्रप्रमुखाः सुराः ॥ प्रोचुः कोल्हा
पुरं क्षेत्रं वाराणस्यां यवाधिकं ॥ ततः शिवश्च शक्तिश्च जग्मतुः स्वस्वमाश्रमं ॥ शिवस्य किंचिद्विमनाः शक्तिस्त्वाद्या तथाभवत् ॥ तत आरभ्य तत्क्षेत्रं का
श्या बहुत्वपि चाधिकं ॥ प्रथितं सर्वलोकेषु वाराणस्यां यवाधिकं ॥ दृष्ट्वैवं क्षेत्रमहात्म्यं विचार्य च पुनः पुनः ॥ स गणो विश्वनाथोपि यत्र चागत्य संस्थितः
॥ शिवसंस्थितिमाकर्ण्य काशिकापूर्वरीपुरा ॥ तीर्थरूपा वसत्यत्र मणिकर्ण्यायुता स्वयं ॥ भागीरथीरूपा गंगा करवीरे महापुरे ॥ पंचक्रोशांतरे षेषा
तीर्थेषु सर्वदेव हि ॥ संतिष्ठति महादेवी प्रकटा जायते क्वचित् ॥ दर्शनस्पर्शनस्नानैः पुनाति हि जगत्त्रयं ॥ श्रीविश्वेशो गतं दृष्ट्वा स्वतीर्थसहितं मुने ॥ प्रया
गतीर्थराजोपि बिंदुमाधवसंज्ञितः ॥ आगत्य संस्थितो यत्र क्षेत्रवायव्यभागतः ॥ काशिकामागतां वीक्ष्य प्रयागं चापि वै मुने ॥ समागतानि तीर्थानि
लोकत्रयगतान्यपि ॥ महाकालीस्वरूपेण वसत्यत्र महेश्वरः ॥ महासरस्वतीरूपो ब्रह्माप्यत्र सुसंस्थितः ॥ साक्षाल्लक्ष्मीस्वरूपेण विष्णुस्तत्रैव संस्थि
तः ॥ त्रयस्त्रिंशत्कोटिदेवाः सर्वेप्यत्र समंततः ॥ आगत्य संस्थिता नित्यं करवीरपुरे वरे ॥ द्वारकापि चागत्य यत्र तिष्ठति पूर्वतः ॥ जीवंत्यां संगता यत्र गो
मती पापहारिणी ॥ चतुर्णामपि वर्णानां यत्र द्वाराणि सर्वतः ॥ अतो द्वारवती प्रोक्ता विद्वद्भिस्तत्त्वदर्शिभिः ॥ अस्थीन्यपि च जंतूनां यत्र चक्रांकितान्य
हो ॥ अद्यापि यत्र दृश्यंते संगमे पतितानि च ॥ नद्योर्जीवंतिगोमत्योः संगमस्था मृदेव हि ॥ तारयेत्सकलान्जंतून्धृतमात्रा ललाटके ॥ तिले तिले वसं

त्यस्मिन्नलिंगानिकरवीरके॥तस्मादिनत्समानंवैतीर्थमन्यन्नविद्यते॥यत्राणुमात्रंसत्यात्रेत्यर्पितंमेरुणासमं॥स्वल्पमप्यत्रयज्ञमंतदानंत्याय
कल्पते॥हुतमप्यत्रचानंत्यंयथाबीजान्महावटे॥जायंतेहिमुनिश्रेष्ठक्षेत्रमहात्म्यतःपरं॥करवीरनीभूमाश्रित्यत्रास्मिन्कुंददातियः॥तेनेयंसक
लांपृथ्वीदत्तारत्नसमन्विता॥अश्वमेधसहस्राणिवाजपेयशतानिच॥गवांगोटिप्रदानंचकरवीरेदत्तभिक्षया॥पुमानाप्नोतिसततंसत्यंसत्यंवदा
म्यहं॥भिक्षार्थमटतोनित्यंदत्तात्रेयोमहामुनिः॥वासिनामक्षयंपुण्यंभिक्षयादावुमत्रकिं॥भिक्षयाप्राप्यतेयद्धिकरवीरनिवासिभिः॥नदत्ये
नीप्यतेसर्वेमहायज्ञैर्महामुनं॥बहवोत्रगतिंलब्धाःकरवीरनिवासिनः॥भिक्षादानेनवोनित्यंश्रद्धयासर्वयोनिषु॥विदवेदार्थदानंहियेत्रकुर्वंति
मानवाः॥तेषांपुण्यंप्रवक्तुंमसहस्रवदनप्रभुः॥द्विजायगृहदानंहियेकुर्वंत्यत्रवैनराः॥तेसर्वेपापनिर्मुक्ताःसर्वलोकेवसंतिहि॥करवीरपुरेयेवै
गांददत्युभयतोमुखी॥संसारभयनिर्मुक्ताःस्वर्गलोकेवसंतिहि॥स्नेयांतिविष्णुमंदिरे॥अन्यान्यपिचदानानियेकुर्वंतिहिमानवाः॥अनंतंचभवे
त्तेषांफलंदानसमुद्भवं॥येचैवनिवसंत्यत्रजपंत्यपिमुनीश्वराः॥कपिलोत्रमुनिर्ज्ञोलाक्षेत्रमध्येसुसंस्थितः॥अहमप्यत्रतिष्ठामिक्षेत्रोद्देशेष्ठतामुने॥
गोतमीसंगमेयत्रद्वारकायांसमेहरिः॥क्षेत्रस्यदक्षिणेभागेअगस्त्यस्निमहानृषिः॥विस्मृत्यकाशिकावासंक्षेत्रमाहात्म्यसारवित्॥क्षेत्रवापश्च 
दिग्भागेतिष्ठत्यत्रपराशरः॥पर्वताग्रेसामतीर्थेसोमेशलिंगसन्निधौ॥व्यासोपिनिर्वटेयत्रविशालनिकेटमुनिः॥वालखिल्यपुरोभागेच्यवनो

पिसुसंस्थितः॥अष्टाशीतिसहस्रंवैमुनयश्चपृथक्पृथक्॥क्षेत्रात्समंततस्सर्वेसंतिष्ठंतिविवेकिनः॥एवंरुद्रादयोदेवानृक्षोपलस्वरूपिणः॥न
त्यजंतीहयत्क्षेत्रंकिंतद्वर्ण्यमहामुने॥पंचक्रोशमिदंक्षेत्रंपावनंकरवीरकं॥संत्यत्रसर्वतीर्थानित्रैलोक्यांतगतानिवै॥गृहाच्चलितमात्रेणकरवी
रंपुरंप्रति॥स्वर्गारोपणसोपानंपितृणांचपदेपदे॥पदेपदेश्वमेधस्यगच्छतःकरवीरकं॥फलंभवेत्समग्रंहिसत्यंसत्यंवदाम्यहं॥श्राद्धकृत्करवीरेयःपि
तृणामनृणोभिसः॥शिरसिश्राद्धकृद्यस्तुकुलानांत्रातमुद्धरेत्॥येनानालोचितंतीर्थंकरवीरमिदंक्वचित्॥याम्यवाराणसीक्षेत्रंनिरर्थंतस्य
जन्मनि॥तस्मात्तमत्रसंस्थित्वातपस्तपश्चरनिश्चलः॥प्राप्यसेसकलानूकामानेहिकामुष्मिकानपि॥शिवालयंदेवगणालयंचमाहेश्वरंयो
गनिरालयंच॥एवंनरोयोविधिवन्महात्म्यंनसंत्यजेत्कोलगिरिंकदाचित्॥८०॥इतिपाद्मपुराणेकरवीरकांडेकरवीरमहात्म्येनारदमार्कंडेय
महामुनिसंवादेद्वितीयोध्यायः॥ मार्कंडेयउवाच॥अत्राश्चर्यमिदंप्रोक्तंक्षेत्रेवैविश्वभावनं॥माहात्म्यंतस्यमेब्रूहिसकलंविस्तरान्मम॥१॥
नारदउवाच॥ऋषेसंशृणुमाहात्म्यंकरवीरपुरस्यहि॥दक्षिणस्याविमुक्तस्यभुक्तिमुक्तिप्रदस्यच॥२॥व्यासतोयस्यमाहात्म्यंप्रवक्तुंपुरुषायुषा
॥सहस्रवदनोनालंमादृशःकिंभवेत्प्रभुः॥तथापिकथयिष्येहंयथाज्ञानंयथाश्रुतं॥यदुक्तंब्रह्मणामत्स्यंतत्सर्वंशृणुनिश्चयः॥विसृज्यकाशिका 
वासंयत्रासभूदुर्मनाःप्रभुः॥अगस्त्योथययोस्थातुंकरवीरपुरेतदा॥महिष्यासहितोत्रत्सन्नदेव्यान्यत्रवासिनः॥विनापुण्येनवैनृणामविमु

करवीरमा० क्तं चैव मुने॥ दक्षिणेनोत्तरे वापि वासो नैष भवेदिह॥ मार्कंडेय उवाच॥ विसृज्य काशिकां नेन कलशोत्थेन वै मुने॥ सर्वाभिज्ञेन मुनिना काशिवास
६ विदा तथा॥ आगत्यापि दैव्यावा करवीरपुरं प्रति॥ वासो नैव च संदिष्टः संदिष्टं स्वामिदर्शनं॥ दक्षिणोत्तरयोः काश्योः वासस्तेस्य महात्मनः॥ कोवां
तरायः समभूत्तत्सर्वं ब्रूहि नारद॥ विनांतरायमन्येपि जडो नैव हि काशिकां॥ त्यजंति मनुजा नित्यं किमुतासौ विपश्चितः॥ कः काशिकां सर्वगुणप्र
काशिकां त्यजेत मंदस्य कुटुंबरामः॥ विश्वेश्वरो यत्र हि जंतुमात्रं समुद्धरेत्स्वात्मपरोपदेशात्॥ कः काशिकां विसृजामीति जंतुस्त्वात्मा पापानी चिंतये
द्वापि मंदः॥ कुंभं हित्वा निधिगर्भं पदा वै भिक्षार्थं वा धारयेत्कः कपालं॥ सूत उवाच॥ इत्थं प्रश्नं द्विजतया त्वां प्रहृष्टो देवर्षिर्वै नारदस्तं मुनींद्रं॥ मार्कंडेयं सं
प्रवक्तुं प्रतस्थे तच्छ्रोतव्यं सावधानैर्भवद्भिः॥ नारद उवाच॥ कदाचिद्विधियोगेन कलशोद्भव एकदा॥ तीर्थालोचनसंप्रीत्या चचारावनिमंडलं॥ संभ्र
मन्सर्वतीर्थानि शिष्यवृंदसमन्वितः॥ नानातीर्थविधिं शिक्षन्नाजगाम कुलालकं॥ पाटलाशोकजंबीरपनसाम्रविभूषितं॥ शुकपारावताकीर्णसा
रीपिकनिनादितं॥ मत्तषट्पदनिर्घुष्टचलत्सयरजःपयः॥ मनोहरतिवै नृणां सरोवरगतिं शुचि॥ हंसकारंडवाकीर्णचक्रकेसारसैरपि॥ शोभितं पक्षि
संघातैर्जलस्थलवनेचरैः॥ तत्राददर्श भगवान्प्रद्युम्नं राजसत्तमं॥ पद्मासनसमारूढं मीलितेक्षणशोभितं॥ हरिध्यानपरं शांतं दंभभेदविवर्जितं॥ ६
तं दृष्ट्वा राजशार्दूलो राजानं दैवयोगतः॥ अहंकारपराभूतः प्रवदच्छास्त्रकोविदान्॥ पश्यताश्चर्यमेतद्धि वयं विप्राः स्वलाश्रमं॥ हरिध्यानछलेना

यं नेत्रे निमील्य वाग्यतः॥ करोति न स पर्यायो मंदभाग्यो यथा पशुः॥ न पृच्छते स्वागतं च स्वागतान्स्वागतान्प्रति॥ प्रभावं मत्कृतं चायं न किंप
श्यति दुर्मतिः॥ येन तोयनिधिः पीतो महारत्नसमुद्भवः॥ वातापील्वलनामानौ दैत्यौ चापि विनाशितौ॥ तं मां न किमयं वेद कुदर्थः कृत्यानि ष्वति॥
नाशिनं न पश्यति न स्वकीयं यत्पुरा कृतं॥ प्रतिबध्नाति हि श्रेयः पूज्यपूजाव्यतिक्रमः॥ ब्राह्मणान्मन्यते सोपि यद्ध्याननिरतोस्य सो ब्राह्मण्य
देवः स हरिस्तद्ध्यानं नायमर्हति॥ हरिपादांबुजं साक्षात्सात्विकैरेव सेव्यते॥ नाधिकारोस्ति यद्ध्याने नाम सस्यास्यैव ध्रुवं॥ तस्मादयं दुर्नीयो य
थान्यं प्रबिभेति मां॥ भव त्वं हि गजो मत्तः इति शप्त्वा गतो मुनिः॥ प्रतिशापं समर्थोपि स राजा हर्युपासकः॥ प्रतिशापं ददौ नैव हरिस्तोत्रं चकार ह॥ सु
द्युम्न उवाच॥ भक्तवत्सल हरे कृपानिधे पाहि पाहि भवपाशविमोचिन्॥ किल्बिषं च कृतमकारि भो मया दंड एष पतितो मम दुःसहः॥ न बिभेमि हरे ज
गत्स्वेतद्दुष्टयोनिगमनादपि नित्यं॥ प्रबिभेमि भगवच्चरणांबुजध्यानहानिकरकरीन्द्रजन्मतः॥ वत्सलोसि यदि भक्तजने विभो नाथ नाथ क
रुणानिधे मम॥ दुष्टयोनिविहितस्य तत्त्विभो चिंतनं चरणयोरुपदेहि॥ नारद उवाच॥ इत्थं स्तुतो मुनिश्रेष्ठ श्रीहरिर्भक्तवत्सलः॥ मा भैरिति
ब्रुवन्नुच्चै राययौ गरुडध्वजः॥ पीतवासा घनश्यामः शंखचक्रगदाधरः॥ वनमालाभियुक्तांगः कंबुकंठो बृहत्तनुः॥ प्रद्युम्नं चाथ राजानं समाश्वास्या
थ लीलया॥ प्रोवाच जगतां नाथ लक्ष्मीमेव पुरःस्थितं॥ श्री विष्णुरुवाच॥ कर्मशेषेण वै राजन्नाजं योनिं प्रधारय॥ अंते मन्मरणं भूयात्तादृश एव

करवीरमा० मनोरथः॥ ततो दृष्ट्वा पार्षदं तूर्णं रेदास्यामि भवतश्चिरं॥ यदन्यैर्नो प्रभुवं तीह नानामखसमृद्धिभिः॥ येन सुश्राविता स्वयं गतस्मादर्थो भविष्यति॥ पर
७ स्य दुःखदो यस्तु स स्वयं दुःखभाग्भवेत्॥ नारद उवाच॥ इत्थमामंत्र्य राजानं हरिः पार्षदसंयुतः॥ जगाम अथ मुनिश्रेष्ठ वैकुंठपुरमुत्तमं॥ कदाचि
त्पर्यटंल्लोकान् गतोहं विष्णुमंदिरं॥ शब्दब्रह्मादिनातोष्य भगवंतमधोक्षजं॥ उपविष्टः सुखं चाहं तदा विष्णुर्जगाद ह॥ विष्णुरुवाच॥ पश्य पश्य
मुनिश्रेष्ठ दौरात्म्यं धर्मजन्मनः॥ सुद्युम्नो येन संभ्रांतो निर्ममो निरहंकृतिः॥ यथा च विघ्नितं तस्य प्रियं मत्सेवनं परं॥ तथा त्वं प्रियमप्यंग विघ्नि
तं कुरु सत्वरं॥ वाराणसीद्वये वासः प्रियस्तस्य महामुने॥ सोंजसा विघ्नितः कार्यो भुक्तिमुक्तिफलप्रदः॥ वाराणसीद्वयं पूर्वं सर्मसृष्टं मयात्र वै॥ का
शिका चोत्तरे देशे करवीरं तु दक्षिणे॥ काश्यां विश्वेशरूपेण स्थितोहं सर्ववेदेवहि॥ तत्रस्थानां च सर्वेषां मोक्षमेव ददाम्यहं॥ तारकस्योपदेशेन सर्व
लोकहितप्रदः॥ स्थितोहं शक्तिरूपेण दक्षिणे करवीरके॥ भुक्तिमुक्तिप्रदानार्थं शक्तिरूपं मया धृतं॥ साक्षाद्विष्णुस्वरूपेण मुक्तिदोहं न भुक्तिदः॥ वा
राणस्याः सकाशाद्धि करवीरपुरं महत्॥ मुक्तिमात्रप्रदायो वै भुक्तिमुक्तिप्रदं महत्॥ मुक्तिमात्रप्रदास्त्वेता पर्युया शृणु नारद॥ अयोध्या मथुरा मा
या काशी कांची त्ववंतिका॥ पुरी द्वारावती चैव सप्तैता मोक्षमात्रदाः॥ भुक्तिमुक्तिप्रदाश्चाथ षट् पर्यस्ता निबोधय॥ करवीरं विरूपाक्षं श्रीशैलं पां ७
डुरंगकं॥ श्रीरंगं सेतुबंधं च भुक्तिमुक्तिप्रदानि षट्॥ पुरीषु सप्तसु प्रोक्तं काशीक्षेत्रं महत्तरं॥ भुक्तिमुक्तिप्रदास्त्वेवं षट् पुरीष्वपि मे मुने॥ याम्यवाराण

सीक्षेत्रं करवीरं महत्तरं॥ अन्यानि सर्वतीर्थानि त्रैलोक्यांतर्गतानि वै॥ अविमुक्तद्वयस्याहि कारणानि तसंश्रयं॥ वाराणसीद्वयं चेदं पावनं सर्वदेहिनां॥
निर्मितं हि मया नूनं जंतूनां हितकाम्यया॥ स्थितोहं तत्र वै साक्षाच्छिवशक्तिस्वरूपतः॥ शिवशक्त्योः समे क्षेत्रे मया यद्यपि निर्मिते॥ तथापि शक्तिकं
क्षेत्रं त्वधिकं दृश्यते मुने॥ शिवशक्त्योर्यदा त्वेवं विवादः समभूत्पुरा॥ मदीयं मम क्षेत्रं हि परमित्यब्रवीच्छिवः॥ शक्तिरप्येवमेवाह क्षेत्रं वै मामकं म
हत्॥ तयोर्विवादनाशार्थं तुलयातुलितं मया॥ मुक्तिमात्रप्रदात्तस्माच्छिवक्षेत्रान्महामुने॥ भुक्तिमुक्तिप्रदं तीर्थमधिकं करवीरकं॥ संजातं तुलया
यस्माद्यवाधिकमितीरितं॥ यद्वा पुरद्वये वासः पुण्यवद्भिरवाप्यते॥ अत्रस्थातुं न चार्हंति द्रुमेषकारिणो जनाः॥ ये वा द्विषंति मद्भक्तांस्ते चापि मु
निसत्तम॥ वाराणसीद्वये स्थातुं न समर्था भवंति हि॥ तस्मादयं बहिर्नेयः काशीवासपरायणः॥ अयमेव हि दंडोस्य भवेदुत्पथगामिनः॥ घंटोद्भव
स्य दुर्बुद्धेर्बहिर्नेयं ममाज्ञया॥ त्वया चांतर्गतेनाथ भक्तेनेत्यब्रवीद्धरिः॥६६॥ इति श्रीपद्मपुराणे करवीरकांडे करवीरमाहात्म्ये नारदमार्कंडेयसं
वादे तृतीयोध्यायः॥ नारद उवाच॥ ततो विनिर्गतश्चाहं विचार्य च पुनः पुनः॥ किमद्यैव मया कार्यं कथं चाहं महामुनिः॥ तूष्णीं काश्यां बहिर्याया
न्नयथाहं समाचरेत्॥ तथा संचिंत्य मनसि गतोहं विंध्यपर्वतं॥ संसारतापसंहारिरेवावारिपरिप्लुतं॥ हेरूप्येणापि कुर्वंतिं स्थावरेण चरेण तु॥
साभिरेव्यनयथार्थाख्या सुंचैर्वसुमतीमिमां॥ रसालरुयं रसालैस्तरशोकैः शोकहारिणं॥ शालैस्तालैर्मालूरैः श्रीतालैरन्यैः सर्वत्र शालिनं॥ नारिके

करवीरमा० लैः सखर्जूरैः धृतछत्रमिवांबरे ॥ उत्सृजंतमिवार्घं वै पतत्पुष्पैरितस्ततः ॥ केकिकेकारवैर्दूरात्कुर्वंतं स्वागतं किल ॥ अथ सूर्यप्रतापासं नभसि द्योति
९ तांबर ॥ मां तदा दृष्ट्वा नूनं लोलो दूरात्सस्कृत्स्नगामहः ॥ दृष्ट्वा मृदुलनां तस्ये ह्रेकृत्प्यपि महो मुने ॥ संतुष्टोहं तदा जातस्त्वद्दर्शनमहोत्सवः ॥ गृहमा
यांतम्मालोक्य गुरुं वा गुरुमेव च ॥ यो गुरुर्नम्नतां धत्ते स गुरुर्न गुरुर्गुरुः ॥ प्रकृत्युच्चैः शिराः सोपि विनम्रतरकंधरः ॥ शैलस्त्विला सिलन्मौलिः
प्रणननामतदा मुनिं ॥ तमुत्थाप्य कराग्राभ्यां माशीभिरभिनंद्य च ॥ तदुद्दिष्टासने तत्र उपविष्टस्तु चादृतः ॥ सदध्ना मधुनाज्येन नीराद्रीक्ष
तदुर्वया ॥ वीधैः कुशैः प्रसूनैस्तु मिष्टान्नांधैरपूजयत् ॥ गृहीतार्चे किलश्रांतं पादसंवाहनादिभिः ॥ गतश्रममथालोक्य बभाषे च ततो गिरिः
॥ अद्य सद्यः परित्यक्तं तदंघ्रिरजसा रजः ॥ तदंगसंगिमहसा सहसाप्यंतरं तमः ॥ सकलर्द्धिरहं चाद्य सुदिवो द्येवमेमुने ॥ प्राक्तनैः सुकृतैरद्य
फलितं मे न्विराजिनैः ॥ धराधरत्वं कुलिषु मान्यं मेद्य भविष्यति ॥ इति श्रुत्वा तदा किंचिदुच्छ्वस्य स्थितवानह ॥ पुनरेव कुलिचरः संभ्रमापन्न
मानसः ॥ उच्छ्वासकारणं ब्रह्मन्ब्रूहि सर्वार्थकोविद ॥ अनुकंपासि मयि चेदुच्यतां प्रणतोस्म्यहं ॥ त्वमागमनजानंदसंदोहे मे दुरोदरः ॥ अलंन
वकुमसकृत्तथाप्येकं वच्म्यहं ॥ धराधराणां सामर्थ्ये येवी दोर्बुद्धिपौरुषे ॥ वर्ण्यं तेसमुदा यात्तदहमेको धरेधरां ॥ नमेरुः स्वर्णपूर्णत्वाद्स्वसानु ९
स्तथाथवा ॥ सुरसंघतया वापि कापि मान्यो मतो मम ॥ हेमकूटत्रिकूटाद्याः कूटोत्तरपदास्तु ते ॥ किष्किंधक्रौंचसह्याद्या भारसह्यानते भुवः ॥ अ

खर्वखर्वगसंसर्गो महत्वाय प्रकल्प्यते ॥ श्रीशैलमुख्याः किंशैलाः नेहसंत्यमकश्रियः ॥ तेषां दर्शनमात्रेण दर्शनं मुक्तये सतां ॥ अंधोस्य बलमा
लोक्य मितिमत्वाहमब्रुवं ॥ नारदउ० ॥ सत्यमुक्तं हि भवता गिरिसारं विदूष्यवता ॥ वरं शैलेषु शैलेंद्रो मेरुस्त्वामवमन्यते ॥ मया निश्वसितं चैतत्त्व
यि चापि निवेदितं ॥ अथ वा मद्विधानां हि केयं चिंता महात्मनां ॥ स्वस्त्यस्तु तुभ्यमित्युक्त्वा गतोहं व्योमवर्त्मनि ॥ गते मयि निनंदस्वमतीवोद्विग्न
मानसः ॥ चिंतामवापमहतीं विंध्यो विंध्यमनोरथः ॥ विंध्य उवाच ॥ धिग्जीवितं शास्त्रकलोज्झितस्य धिग्जीवितं धर्मविवर्जितस्य ॥ धिग्जीवितं व्य
र्थमनोरथस्य धिग्जीवितं ज्ञातिपराजितस्य ॥ कथं भुनक्ति स दिवा कथं रात्रौ स्वपित्यहो ॥ रहः स्वामे कथं तस्य यस्याभिभवनं रिपोः ॥ किं करोमि क ग
च्छामि कथं मे लंजयाम्यहं ॥ उत्पत्य तस्य शिरसि तपामिच तपाम्युत ॥ अथवा स कथं मेरुस्तर्थोच्चैः स्पर्द्धते मया ॥ भ्रमिसारथ्यताः प्रायो भवंति भ्रां
ति भ्रमयः ॥ अलीकं वाक्यमथवा संभाव्यं नारदमुनौ ॥ ब्रह्मचारिणि वेदज्ञे सत्यलोकनिवासिनि ॥ युक्तायुक्तविचारोयं मादृशो नोपयुज्यते ॥
पराक्रमेश्वसक्तानां विचारं गाहते मनः ॥ क्षपामनसि संचिंत्य भवेदित्थमसंज्ञायं ॥ विचक्षणो रूपक्षोनवर्धमानो जयो ॥ मेरुं प्रदक्षिणीकुर्वन्नि
त्यमेव दिवाकरः ॥ सग्रहर्क्षगणो नूनं मन्यमानो बलाधिकं ॥ इति निश्चित्य विंध्याद्रिवर्धे समृपेक्षणः ॥ अनंतं गगनस्यांतं कुर्वन् श्रृंगैः शिखरैरिव ॥ के
श्चित्साकं विरोधो न कर्तव्यः केन चित्क्वचित् ॥ कर्तव्यश्च प्रयत्नेन यथा नोपहसेज्जनः ॥ निरुध्य ब्राध्नमध्वानं कृतकृत्य इवाद्रिराट् ॥ स्वस्थो भवद्

करवीरमा०

९

ग लिं

वाधीनाः प्राणिनो हि भविष्यति॥ यमद्य यमकर्त्तासौ दक्षिणं प्रक्रमिष्यति॥ स कुलीनः स च श्रीमान्समहान्महितः शुचिः॥ यावत्त्वच शक्तिं शक्तोपि
नदर्शयति कर्हिचित्॥ तावल्लंघ्यः सर्वेषां ज्वलनो दारुणो यथा॥ इति चिंता महाभारं त्यक्त्वा तस्थौ स्थिरो द्यमः॥ आकांक्षमाणस्तरयोरुदयं त्र
त्मयोयथा॥ सूर्य आत्मास्य जगतः तस्थुषः स्तमसो रिपुः॥ उदीयायोदयगिरौ शुचिप्रस्तमरैः करैः॥ संवर्धयन्सतां धर्मान्यकुर्वंस्तामसीं तनुं॥
पद्मिनीं बोधयंस्तुष्टां रात्रौ मुकुलिताननां॥ हव्यं कव्यं भूतबलिं देवादीनां प्रवर्तयन्॥ प्राह्णापराह्णमध्याह्नक्रियाकालं विजृंभयन्॥ अल्पतां
त्विदिवल्केषु निर्दिष्टां स्तामसीं गतिं॥ यामिनी कालकलितं जगदुज्जीवयन्पुनः॥ यस्मिन्नभ्युदिते जातः सम्यक्पुण्यजनोदयः॥ अहो परोपकर
णं सद्यः फलति नितिं चेत्॥ सायमस्तमितः प्रातः कथं जीवेद्रविः पुनः॥ सुदक्षिदक्षिणामाशामाशानाथः प्रतस्थिवान्॥ क्रमेण तः सर्वमर्वतो हेलया
हेलिकस्य च॥ नशेकुरग्रतो गंतुं ततो न्दूरुर्व्यजिज्ञपत्॥ अरुण उवाच॥ भानो मानोन्नतो विंध्यो निरुंध्य गगनं स्थितः॥ स्पर्द्धते मेरुणा त्रेपक्रस्त्व
दत्तां तु प्रदक्षिणां॥ अनूरोर्वाक्यमाकर्ण्य स निताह्य चिंतयत्॥ अहो गगनमार्गोपि रुध्यते चाति विस्मितः॥ योजनानां सहस्रे द्वे द्वे शते द्वे च यो
जने॥ योजनस्य निमेषार्धो घातिसोपि चिरं स्थितः॥ गते बहुतिथे काले प्राच्योदीच्याः शुभा दिशाः॥ चंडरश्मेः करव्रातपातसंतापतापिनाः॥ पश्चा ९
त्यादाक्षिणात्याश्च निद्रामुद्रितलोचनाः॥ श्वायीना एव वीक्ष्यंते स तारग्रहमंबरं॥ अहो नाहस्करा भावान्निशाने वा निशाकरात्॥ अस्तं गतस्त्वा

न्नभसः कः कालस्त्विष निक्ष्यते॥ ब्रह्मांडं किमिमे कांडे चेलयं मेष्यति नत्कथं॥ परापनं तिनाद्यापि पारावाराद्रत स्ततः॥ स्वाहास्वधावषट्कारवर्जिते ज
गतीतले॥ पंचयज्ञक्रियालोपाच्चकंपे भुवनत्रयं॥ सूर्योदयात्प्रवर्तंते यज्ञाद्याः सकलाः क्रियाः॥ नाभिर्यज्ञभुजां तृप्तिः सविता तत्र कारणं॥ चित्रगु
प्ताद्यः सर्वे कालं जानंति सूर्यतः॥ स्थितिः सर्गविसर्गाणां कारणं केवलं रविः॥ तत्सूर्यस्य गतिस्तंभात्स्तंभितं भुवनत्रयं॥ यद्यत्र तत्र तत्स्थितं तत्र चि
त्रं न्यस्तमिवाखिलं॥ एकतस्तिमिरान्ने शांदिकतस्तुदिवातपात्॥ बहूनां प्रलयो जातः कांदिशीकमभूज्जगत्॥ इति व्याकुलिते येकेसुरासुरनरो
रगे॥ आः किमेतदकांडे भूद्दुरुदुर्द्दुरुदुरुः प्रजाः॥ ततः सर्वे समालोच्य ब्रह्माणं शरणं ययुः॥ स्तुवंतो विविधैः स्तोत्रै रक्षरक्षेति चाब्रुवन्॥ देवा ऊचुः॥
नमो हिरण्यगर्भाय ब्रह्मणे ब्रह्मरूपिणे॥ अविज्ञातस्वरूपाय कैवल्यायामृताय च॥ यन्न देवा विजानंति मनो यत्रापि कुंठितं॥ न यत्र वाक्प्रभ
वति नमस्तस्मै चिदात्मने॥ योगिनो यं हृदाकाशे प्रणिधानेन निश्चलाः॥ ज्योतिरूपं प्रपश्यंति तस्मै श्रीब्रह्मणे नमः॥ कालात्पराय कालाय स्वेच्छ
यापुरुषाय च॥ गुणत्रयस्वरूपाय नमः प्रकृतिरूपिणे॥ विष्णवे सत्वरूपाय रजोरूपाय वेधसे॥ नमस्ते रुद्ररूपाय सर्गस्थित्यंतकारिणे॥ नमो
बुद्धिस्वरूपाय त्रिधाहंकृतये नमः॥ पंचतन्मात्ररूपाय पंचकर्मेंद्रियात्मने॥ नमो बुद्धिस्वरूपाय पंचबुद्धींद्रियात्मने॥ क्षित्यादिपंचरूपाय नमस्ते
विषयात्मने॥ नमो ब्रह्मांडरूपाय तदंतर्वर्तिने नमः॥ अर्वाचीनपराचीनविश्वरूपाय ते नमः॥ अनित्यनित्यरूपाय सदसत्पतये नमः॥ नमस्ते भ

करवीरमा० क्रूरूपयास्त्विच्छाविष्कृतविग्रहः॥ तव निश्वसितं वेदास्तव रेतोऽखिलं जगत्॥ विश्वाभूतानि ते पादाः शीर्षो द्यौः समवर्तत॥ नाभ्या आसीदं
१० तरिक्षं ते लोमानि वनस्पतिः॥ चंद्रमा मनसो जातः चक्षोः सूर्यस्तव प्रभो॥ त्वमेव सर्वं त्वयि देव सर्वं स्तोता स्तुतिः स्तुत्य इह त्वमेव॥ ईश त्वया
वाच्यमिदं हि सर्वं नमोऽस्तु भूयोऽपि नमो नमस्ते॥ इति स्तुत्वा विधिं देवा निपेतुर्दंडवत्क्षितौ॥ परितुष्टस्तदा ब्रह्मा प्रत्युवाच दिवौकसः॥ ब्रह्मो
वाच॥ यथार्थमनया स्तुत्या श्रद्धावान्प्रत्यहं शुचिः॥ मां वा हरं वा विष्णुं वा तुष्टास्तस्य सदा वयं॥ दास्यामः सकलान्कामान्पुत्रपौत्रान्पशून्व
सू॥ सौभाग्यमायुरारोग्यं निर्भयत्वं रणे जयं॥ ऐहिकामुष्मिकान्भोगानपवर्गं तथाक्षयं॥ यद्यदिष्टतमं यस्य तत्तस्य भविष्यति॥ तस्मा
त्सर्वप्रयत्नेन पठितव्यस्तवोत्तमः॥ अभीष्टद इति ख्यातः स्तवोऽयं सर्वसिद्धिदः॥ पुनः प्रोवाच तान्वेधाः प्रणिपत्य स्थितान्सुरान्॥ स्व
स्थास्तिष्ठत भो यूयं किमत्रपि समाकुलाः॥ स्पर्धते मेरुणा विंध्यो ब्रध्नाध्वपरिरोधकृत्॥ यदर्थमागता यूयं तमुपायं वदामि वः॥ ब्रह्मोवा
च॥ अस्त्यगस्त्यस्तप्यमानः तपउग्रं महातपाः॥ मित्रावरुणिराधाय चित्ते विश्वेश्वरे विभो॥ अविमुक्ते महाक्षेत्रे सर्वेषां मुक्तिहेतवे॥ तारक
स्योपदेशार्थं विश्वेशाधिष्ठिते स्वयं॥ प्रार्थ्यध्वं तत्र गत्वा तं सर्वः कार्यं विधास्यति॥ तं नैकदाचित्तास्लोका वातापील्वलभक्षणात्॥ तदाप्रभृति १०
वैलोके कागस्त्यान्नैव बिभ्यति॥ नारद उवाच॥ इत्युक्तां तदेधे वेधास्तेपि प्रमुदिताननाः॥ देवाः परस्परं प्रोचुरहो धन्यतमा वयं॥ प्रसंगतो

पि द्रष्टव्यो काशी काशीपतीश्वरौ॥ अहो स्वदेहोभिर्बहुभिः फलितो नो मनोरथः॥ उत्फुल्लपद्मनयना निर्मितः सुदिवाघनः॥ चरणौ तौ सुचर
णौ यौ यौ काशीमभियायिनौ॥ एका क्रिया द्व्यर्थकरी प्राप्यं ते पुण्यं गौरवात्॥ एवं वदंतो हृष्टास्या सुराः काशीं समाययुः॥ इति श्रीपद्मपुराणे
करवीरमहात्म्ये नारदमार्कंडेयसंवादे चतुर्थोध्यायः॥ ॥ मार्कंडेय उवाच॥ भगवन्भूतभव्यादि सर्वज्ञानमहानिधे॥ अवाप्य काशीं
गिर्वाणैः किमकारि वदाव्यय॥१॥ अश्रुश्मां कथां पुण्यां नतसिमधियाम्यहं॥ भो वधिस्तपसां देवैरगस्त्यः प्रार्थितः कथं॥ कथं विंध्यो प्यवाप
स्वां प्रकृतीं तादृशीं ततः॥ तव वागमृतं भो धो मनो मे स्नातुमुत्सुकं॥ नारद उवाच॥ ऋषेशृणु महाबुद्धे भक्तिश्रद्धासमन्वितः॥ ततो वाराणसीं
वाप्य गीर्वाणास्ति सवासवाः॥ अविलंबं प्रथमतो मणिकर्ण्यां विधानतः॥ सचैलं तु समज्ज्याथ कृतसंध्यादिसत्क्रियाः॥ संतर्प विधिवद्दिव्याप
तृन्कुशतिलादकैः॥ तीर्थवासार्थिनः सर्वान्संतर्प्य च पृथक्पृथक्॥ विश्वेश्वरं भवानीं च पूजयित्वा विधानतः॥ काशीगुणानुकथनं कुर्वंतो ज
ग्मुरोजसा॥ अगस्त्यस्याश्रमं सर्वे गीर्वाणा वासवादयः॥ सर्वार्थो नाममंत्रदात्री भवनी सर्वान्कामान्पूरयेत्तत्र तुष्टिः॥ सर्वान्जंतून्तारयेदंतकाले
विश्वेशोयः सोत्र मंत्रोपदेशात्॥ विश्वेश्वरो यत्र न तत्र चित्रं धर्मार्थकामामृतरूपरूपः॥ अरूपरूपः स हि विश्वरूपं तस्मान्न काशीसदृशी त्रिलो
के॥ इति ब्रुवाणा गीर्वाणास्ते तां वेदहृदश्रुमुनेः॥ होमधूम्रसुगंधाढ्यां बटुभिर्बहुभिर्वृतां॥ पतिव्रता सिरोरत्नलोपामुद्रांघ्रिमुद्रया॥ मुद्रितं वीक्ष्य

विविद्युं पर्णशालां गणं सुराः॥ विसर्जितसमाधिं च धृतकर्णाक्षमालकं॥ अधितिष्ठन्दृषां पृष्ठं ब्रह्माणमिव चापरं॥ पुरोगस्त्वं समालोक्य सर्वे
देवाः सवासवाः॥ प्रहृष्टवदनाः प्रोचुरुच्चैर्जय जयेति च॥ मुनिरुत्थाय तान्सर्वाननुपूर्वं यथोचितं॥ आशीर्भिरभिनंद्याथ पप्रच्छागमकारणं॥ नारद उवाच
अगस्तिवचनं श्रुत्वा बहुमानपुरःसरं॥ धिषणाधिपतेरास्यं विबुधास्तालुलोकिरे॥ भृगुरुवाच॥ शृणुष्वेतन्महाभाग देवागमनकारणं॥ धन्योसि कृ
तकृत्योसि मान्योसि महतामपि॥ पतिव्रतेन त्वं कल्याणी लोपामुद्रा सधर्मिणी॥ तवांगच्छायया स्तुल्या यत्कथा पुण्यकारिणी॥ परलोकस्त्वयं लोको जी
यते भार्यया द्वयं॥ देवर्षिपितृतिथीज्यादि नाभार्यः कर्म चार्हति १८ गृहस्थः स हि विज्ञेयो यस्य गेहे पतिव्रता॥ ग्रस्यंतेन्यः प्रतिपदं रात्रिस्या जरयाय
था॥ यथा गंगावगाहेन शरीरं पावनं भवेत्॥ गंगास्नानसमं त्वेतद्यज्ञानं नवदर्शनं॥ इति स्तुत्वा महाभागां मुनिपत्नीं पतिव्रतां॥ प्रणम्याथ मुनिं प्राह
मुनिः सर्वार्थकोविदः॥ प्रणवस्त्वं श्रुतिरियं क्षमैषा त्वं स्वयं तपः॥ यत्क्रियेयं फलं त्वं हि धन्योसीति महामुने॥ इयं पातिव्रतं तेजो ब्रह्म त्वं तेजो भवान्परं॥ त
त्राप्येतत्तपस्तेजः किमसाध्यमतस्तव॥ नवनाविदितं किंचित्तथापि प्रवदाम्यहं॥ यदर्थमागता देवास्तन्मुने त्वं निशामय॥ अयं शातमखः साक्षाद्वृत्र
हा कुलिशायुधः॥ षिध्यष्टकं हि यद्वारि दक्षु प्रसादं प्रचक्षते॥ यस्य पुर्याः परिसरे कामधेनुर्व्रजे स्वैरं तू॥ यं तोराः कल्पवृक्षाणां नित्यं छायासु शेरते॥ यद् 
ध्यासु चतिष्ठंति ते चिंतामणिशर्कराः॥ अयमग्निर्जगज्ज्योतिर्धर्मराजोस्त्वयं पुनः॥ निर्ऋतिर्वरुणो वायुश्रीदो रुद्रादयस्त्वमी॥ आराध्यं ते सुचारित्रैः स

र्वकामार्थमीश्वरः॥ समभ्यर्थ इतारोमीत्वं प्रोच्यस्तु जगत्कृते॥ वाञ्छा त्वायत्र साध्यं च नवविश्वोपकारकं॥ कश्चिच्छैलो विंध्यनामा भानुमार्गाव
रोधकः॥ वर्धते स्पर्धया मेरोस्तद्वृद्धिं त्वं निबर्हय॥ ये वा स्वभावकुटिला ये च मार्गावरोधकाः॥ परस्पर्द्धी वृद्धिमंतस्त हृद्धिर्गेर्हिता बुधैः॥ इति श्रुत्वा गु
रोर्वाक्यं स विचार्य महामुनिः॥ क्षणं मनः समाधाय तथेति प्रत्युवाच ह॥ साधयिष्यामि वः कार्यं विसर्जेति दिवौकसः॥ मुनिश्चिंतापरो भूत्वा शास्ति
ध्यानपरोभवत्॥ नारद उवाच॥ ततो ध्यानेन विश्वेशमालोच्य स मुनीश्वरः॥ ऋषिः प्रोवाच तां पुण्यां लोपामुद्रामिदं वचः॥ अगस्त्य उवाच॥ अपि
पश्य वरारोहे किमेतत्समुपास्थितं॥ कृतत्का यैर्वृत्र वयं मुनिमार्गानुसारिणा॥ येन गोत्रभिदा गोत्रविपक्षाहि लया कृताः॥ भवेत्कुंठित सामर्थ्य
सकथां गिरिमात्रके॥ कल्पवृक्षो गणे यस्य कुलिशं यस्य चायुधं॥ सिध्यष्टकं च यद्वारि स सिध्येमार्थये द्विजं॥ कीयंते व्याकुलाः शैलाः अहोदा
वाग्निनार्चये॥ न हृद्धिस्तं भनेशा क्रिकृगतासाशक्ष्युक्ष योः॥ नियंता सर्वभूतानां योसौ दंडधरः प्रभुः॥ स किं दंडयितुं नालं मे कृते ग्राव मात्रकं॥ आ
दित्या वसवो रुद्राः स्तुषिताः समरुद्गणाः॥ विश्वेदेवास्तथा दस्रौ ये नान्येपि दिवौकसः॥ येषां दृक्पातमात्रेण पतितं भुवनान्यपि॥ ते किं समर्था
नो कांते गिरिवृद्धिनिषेवणे॥ अज्ञानं कारणं तत्र स्मृतं वाक्यं सुभाषितं॥ काशीमुद्दिश्य यद्गीतं मुनिभिस्तत्त्वदर्शिभिः॥ अविमुक्तं न मोक्तव्यं स
र्वथैव मुमुक्षुभिः॥ किंतु विघ्ना भविष्यंति काश्यां निवसतां सतां॥ उपस्थितो हं कल्याणि सों तरायो महानिह॥ न शक्यते न्यथा कर्तुं विश्वेशो विमु

खोयतः॥ काशी द्विजाशीभिंरहो यदा त्राः कस्यां मुमुक्षुर्यदि वै मुमुक्षुः॥ ग्रासं करस्थं स विसृज्य तद्यं स्वकूर्परं लेढि विमूढचेताः॥ अहो जना बालि
१२ शवत्किमेतां काशीं त्यजेयुः सुरुतैकराशीं॥ शालूककंदप्रतिमज्जनं किं लभेत नद्यत्फलभा किमेषा॥ भवांतरावर्जितपुण्यराशिंच्छेत्त्वे मेहद्धि वि
नि मप्यकाशीं॥ संप्राप्य किं मूढ प्रकाशिका कुकार्य मन्यत्स्परतो हितुच्छं॥ न तं डितोन्यत्र कुतः प्रयाति किमत्ति कुष्मांडफलं त्यजास्य॥ हैयक्षरा
जरजनीकरचारुसृष्टेः श्रीपूर्णसूतनियामकदंडपाणे॥ त्वं वैतपो जनितदुःख मवेषि सर्वं किं मां बहिर्नयसि काशिनिवासरक्षिन्॥ पराप वादो नमयाकि
लो कः परोपकारोपि मयाकृतो न॥ परस्वबुद्धिः परदारबुद्धिःकृता मयांत्रैवकएषपाकः॥ अभ्यर्थितो देवगणैः करोमि किं परोपकाराय न किं विधीयते॥
दधीचिरस्थीनि पुरा न विंदो जगत्त्रयं किं न ननंद दर्थिने बलिः॥ दत्तस्मनो किं मधुकैटभो शिरो बभूवताक्ष्योपि च विष्णुवाहनं॥ अपृच्छ सर्वान्स मुनीन्मुनीश्व
रः सबालवृद्धान पि तत्रवासिनः॥ तृणानि वृक्षाश्च लताः समस्ताः पुरीं परीक्रम्य च निर्ययौ बहिः॥ अश्रुण्युपस्पृश्य पुनः पुनर्मुनिप्रासादमालाः परि
तो विलोकयन्॥ उवाच नेत्रे सरले प्रपश्य तां काशीं युवां वा कुपुरीं त्वियं च॥ चिरं हसंस्तव्यविधाय तालिकां मिथः करेणापि करं प्रगृह्य॥ सीमाचराभूतग
णाभजाम्यहं विहाय काशीं सुरुतैकराशिं॥ इत्थं विलोक्य बुदुशाः स मुनिस्त्वगस्त्यस्तल्लोकोच युग्मवदनो भवलासहायः॥ मूर्छामवाप महतीं विरही १२
च जल्पन्हा काशि काशि पुनराह च देहि दृष्टिं॥ स्थिता क्षणं शिवशिवेति तितेंदे वचो त्का यावच्छ्रियंति कठिणा हि दिवौकसस्ते॥ यावद्वजे स्थिच

तुराणि पदानि खेदात्स्वेदादि बिंदुकणिकाचितभालदेशः॥ प्रत्यक्क्रमाकरणतः किल मे विनाशः स्तावद्रहाभयभरादिवसं चुकोप॥ तपोया
न मिवाकृत्य निमिषार्धेन वै मुनिः॥ अग्रे ददर्श तं विंध्यं रुध्यांबरमतो गजं॥ चकंपे चाचलस्तूर्णं दृष्ट्वाग्रे स्थितं मुनिं॥ नमगस्त्यं सपत्नीकं वा
तापीत्वलवैरिणं॥ लपः क्रोधसमुत्थाभ्यां काशी विरहजन्मना॥ प्रलयानलवत्तीव्रं ज्वलंतं त्रिभिरग्निभिः॥ गिरिः खर्वतरो भूत्वा विविक्षन्निव
नीमिव॥ आज्ञा प्रसादः क्रियतां किंकरोति मीचाब्रवीत्॥ अगस्तिरुवाच॥ विंध्य साधुरसि प्राज्ञ मां विजानासि तत्वतः॥ पुनरागमनं याव
त्तावत्वं खर्वतरो भव॥ नारद०॥ इत्युक्त्वा दक्षिणामाशां सनाथामकरोन्मुनिः॥ निजेश्वरयाविन्यासैः स्तत्यासाध्व्या तपोनिधिः॥ गंतं तस्मिन्मु
निर्वरे वेपमानस्तदा गिरिः॥ उत्कंठमसकृत्सभ्यन्साध्वसं परमंगतः॥ अद्य जानः पुनरहं न शप्तो यदगस्तिना॥ नमयासदृशो धन्य इति मे
चौदे ने स वै गिरिः॥ अरुणोपि च तत्काले कालज्ञोश्वानवर्लियन्॥ जगत्स्वास्थ्यमवापोच्चे पूर्ववज्ञानुसंचरैः॥ अद्य श्वो वा परश्वो वाप्यागमिष्यति न
वै मुनिः॥ इति चिंता महाभारे गिरिराक्रांतवस्थितः॥ नाद्यापि मुनिरायाति नाद्यापि गिरिरेधते॥ यथा खलजनानां हि मनोरथमहीरुहाः॥ वि
ष्य वर्धितीयो नीचपरास्त्यांसमुद्धहन्॥ दूरं तद्विवाचोरत्तां प्राग्भ्रूंदेरपिसंशयः॥ मनोरथा न सिध्यंति सिक्षानस्यंति वै ध्रुवं॥ खलानां ते कुद्रालि
नं सर्वे विश्वेशरक्षितं॥ अविज्ञायान्यसामर्थ्यं निजशक्तिप्रदर्शयन्॥ उपहासमवाप्नोति यथैवायमिहाचलः॥ ७१॥ इति श्री पाद्मे महापुरा

करवीरमा॰ ये करवीरकांडे नारदमार्कंडेयसंवादे विंध्यगर्वपरिहारो नाम पंचमोध्यायः॥ ॥नारद उवाच॥ गोदावरीतटे रम्ये विचरन्नपि वै मुनिः॥ न
१३ तत्याज च संतापं काशीविरहजं परं॥१॥ उदीचीं दिकृस्पर्शमपि स मुनिर्मानरश्मिनं॥ प्रासार्यबाहुं संश्लिष्य काश्याः पृच्छेदनामयं॥ लोपामु
द्रेन सा मुद्रा क्वापि हजगतीतले॥ वाराणस्याः प्रदर्शीति तत्कृतीनयतो विधिः॥ क्वचित्तिष्ठन्क्वचिज्जप्यन्क्वचिद्ध्यायन्क्वचिज्ज्वलन्॥ क्वचि
च्छोपविश्रांश्चेति बभ्रामितस्ततो मुनिः॥ प्राणत्यागपरो भूत्वा महाचिंतापरो भवेत्॥ क्व गच्छामि क्व तिष्ठामि क्व वशीष्याम्यहं भुवि॥ न पाभूमिः पं॰रि
क्व मां भूयाद्याकाशी सदृशी मम॥ त्राहि विश्वेश विश्वात्मन्नूत्राहि भक्तार्तिनाशन॥ बुद्धियोगपरिश्लेषान्मतिलीनाभि तिस्थिता॥ अंतर्यामि
तया विश्वं सर्वं व्याप्य सुसंस्थितः॥ तादृशं तीर्थवर्यं हि त्वद्दर्शं मे प्रकाशय॥ दर्शनं यत्र तेभूयाद्यथाप्रासे मनोरथं॥ नो वा त्यजामिदं देहं वेल्लद्वियो
गाग्निनाहतं॥ इति व्याकुलचित्तस्य पततस्तस्य वै पथि॥ प्रादान्मतिं स विश्वेशो हृदयेनुप्रविश्य च॥ स्मृतं तदा महत्क्षेत्रं करवीरं यथाधिकं॥ समु
त्थाय ततः प्राह प्रियां चलचलेति सः॥ तमालोक्य मुनिश्रेष्ठं सुस्मितं साश्रुचिस्मिता॥ पतिवाक्यमुवाचेदं लोपामुद्रा मनोरमं॥ लोपामुद्रा उवा
च॥ मत्प्राणाधिपते स्वामिन्पृच्छाम्येकं वदस्व तत्॥ यस्मृतं हि तथानूनं महदानंदलक्षितं॥ अन्यत्र शीघ्रगमनं काशीविरहतो मुने॥ घटनः प १३
ति तस्य हनेवे जातु कदाचन॥ मन्यसे यदि तच्छक्यं मया ज्ञातुं महामुने॥ निदानं ब्रूहि सकलं तवानंदमहोदधे॥ नारद उवाच॥ इति प्रियानुपृष्टः सन्

प्रोवाचार्थं घटोद्भवः॥ याम्यवाराणसीक्षेत्रमाहात्म्यं त्वदि संस्मरन्॥ अगस्त्युवाच॥ शृणुष्वाथ वरारोहे महदानंदकारिणं॥ श्रीविश्वेशप्रसादेन
संस्मृतं करवीरकं॥ याम्यवाराणसी चेति त्रिषु लोकेषु विश्रुतं॥ जंबूद्वीपशिरोरत्नं भुक्तिमुक्तिप्रदं शिवं॥ देव्या विष्णुस्वरूपिण्यायहृतं दक्षिणे
करे॥ यस्मात्याचंद्ररूपिण्या काशीविरहजोनलः॥ शामितो मम सुश्रोणी तत्क्षेत्रं किंतु वर्ण्यते॥ विश्वेदेवेशीर्नेयत्र काशीवासश्च मस्त्रियः॥ स्ना श
नं हि मणिकर्ण्यं च मस्त्रियं च वरानने॥ सर्वमेतद्भवेन्नूनं करवीरे महापुरे॥ अधिकं चापि भूयान्म महादेव्याप्रदर्शनं॥ भुक्तिमुक्तिप्रदानार्थं स्थि
ता या जगतीतले॥ वसं तत्र करिष्यामि सर्वदेवनिषेविते॥ तीर्थवृंदसमाकीर्णे करवीरपुरे सदा॥ इत्याशयेव सुश्रोणी काशीविरहजं म
हत्॥ दुःखं विस्मृत्य वै सर्वं जातस्त्वानंदनिर्भरः॥ पूर्वं संकल्प इत्यासीद्गंतव्यं करवीरकं॥ विधिनाद्य सुसंपूर्णो महद्भाग्यहिमामकं॥ परोपका
रणं जतार्यथा फलतितत्क्षणात्॥ तथान्ये सर्वधर्मा वै न फलंतीति मे श्रुतिः॥ एकात्रियाद्यार्थकरी पुण्यवद्भिरवाप्यते॥ यद्वि विंध्यस्य दम
नं करवीरप्रदर्शनं॥ पंचक्रोशांतरे येव त्रिस्थली यत्र विद्यते॥ प्रयागं काशिकां चैव गयां रोद्री शुचिस्मिते॥ संकल्पं यत्र कुर्वंति करवीरपुरं
शुभं॥ गंतव्यमिति तेषां वै पितॄणां मुक्तसंश्रृणु॥ संमील्य पितरः सर्वे वंशजाः सर्व एव हि॥ परस्परं वदंत्येवं महानंदाभिसंस्तुताः॥ सर्वे ध्व
जपताकादि लंबयित्वा समुत्सुकाः॥ अद्य श्वो वा परश्वो वागंता रुद्रगयां प्रति॥ वंशजश्चास्मदीयो वै करलतालसमुत्सुकाः॥ निर्गतं वंशजं

कर० मा० दृष्ट्वापरमानंदनिर्भराः॥वर्णयंतिचतेभाग्यंस्वकीयंहिपरस्परं॥पितरऊचुः॥अहोवयंधन्यतमान्नृलोकेगंतास्मदीयःकिलवंशजोयं॥गयां
१४ हिरोद्रींकरवीरसंस्थितांपिंडान्समायात्यहितारयिष्यति॥अतिधन्याकरवीरसंस्थितांगत्वाप्रयागंकरवीरसंस्थितं॥किंदत्तवांन्वेनहि
वंशजातोस्मान्किंत्वोदकेनेवहितारयिष्यति॥धन्यावयंभोपितरःसुश्रूयवतांगतस्त्ववंशप्रभवश्चकाशिकां॥कोल्हापुरस्थांभवपाशभे
दिकांस्नात्वाप्रदत्वासहितारयेकुलं॥अहोवयंधन्यतमास्तलोकेयथैश्रुतंत्वेप्रभवेपवित्रे॥पुनातिलोकत्रयसकुलंस्थितंकोल्हापुरंगच्छति
धन्यएषः॥अहोतिधन्यःपरपुण्यवानयंऋणत्रयंयेनपराकृतंमहत्॥रोद्रींगयांगंतुमथोद्यतस्त्वराद्कोल्हापुरंपुत्रवरोत्रलोके॥अहोजनाबा
लिशाएवसर्वेनोयत्रगच्छंतिमहद्विमृग्यं॥कोल्हापुरंतीर्थवरंयवाधिकंवाराणसीक्षेत्रमितिप्रसिद्धं॥कुलोद्भवंपिंडदमत्रदृष्ट्वाव्रजामिलोकंपरमं
पवित्रं॥यैर्वैगत्वाननिवर्तंतिसर्वेपुण्योपेतापरमानंदयुक्ताः॥धनीयशस्वीबहुपुत्रपौत्रोभवेदयंपुत्रवरःसदैव॥कुलंपवित्रीकृत्यैमनेनसत्यंग तै
कं त्वाविचित्रंकरवीरेपुरं॥पिंयेयस्क्षेत्रमाहात्म्यंवर्णयंतिदिविस्थिताः॥नेदृक्क्षेत्रंपरंकिन्तुवर्ण्यतेकरवीरकं॥करेकिंविधृतंलक्ष्म्याभुक्तिमुक्तिप्रदंपरं॥
निमिषार्धवियोगोपिशतवर्षायतेमम॥नारदउवाच॥इतिवाक्यमाकर्ण्यपरमानंदनिर्भरा॥महात्म्यंकरवीरस्यपप्रच्छाथसुविस्मिता॥लोपामुद्राउवाच १४
किमर्थंहिमहादेव्याकरवीरंमहापुरं॥करमध्येधृतंचेदंकथंवाभुक्तिमुक्तिदं॥तत्सर्वंकथयस्वामिन्कृपयादीनवत्सल॥महात्म्यश्रवणात्तस्यनिश्च

लास्यान्मतिर्मम॥अगस्तिरुवाच॥एकदातुलितंसुभ्रुक्षेत्रयुग्मंहिविष्णुना॥याम्यवाराणसीक्षेत्रंतथैवोत्तरसंस्थिता॥गौरवंलाघवंवापिज्ञा
तंक्षेत्रद्वयस्यहि॥पुनर्विवादःसमभूच्छिवशक्त्योर्यदाशुभे॥तदान्येचप्रकारेणलाघवंगौरवंतयोः॥ज्ञातंप्रोवाचभगवान्महाविष्णुरतंद्रितः॥वि
ष्णुरुवाच॥विश्वनाथमहादेवश्रीलक्ष्मीमत्स्वरूपिणी॥उभयोःक्षेत्रयुग्मंचप्रभुविस्थातुंनचार्हति॥तस्मात्पुरद्वयंचेदंउभयोःशूलकोटिना॥शू
लाग्रेणगदाग्रेणकामहस्तधृतेनवै॥आचंद्रतारंध्रियतामुभाभ्यामपिसंततं॥अगस्तिरुवाच॥एवमुक्तोविश्वनाथःशूलाग्रेणस्वकांपुरीं॥दधार
लीलयासुभ्रुतदाकाशीपुरींशिवः॥ततोलक्ष्मीमहादेवीस्वपुरंकरवीरकं॥वामहस्तसमाश्लिष्टगदाग्रेणमहाबला॥क्षेत्रंक्षेत्रवराकीर्णमिह
मुत्रफलप्रदं॥तदाविष्णुःप्रहस्याहशिवशक्त्योरिदंवचः॥विष्णुरुवाच॥लाघवंगौरवंचैवयुवयोःक्षेत्रयोरिदं॥विज्ञातंमेप्रदिष्टंचयुवयोःक्षेत्रधारणं॥
विश्वनाथत्वयाशीघ्रंतावकंक्षेत्रमुत्तमं॥लघुत्वाद्विधृतंनूनंत्रिशूलाग्रेणलीलया॥धनुराकारकस्येहभवेत्क्षेत्रस्यलाघवं॥भवेत्तवसमादिष्टंकिंच
दूनेनयत्रहि॥महालक्ष्म्यामहादेव्याक्षेत्रंवैकरवीरकं॥गदाग्रेणमयाबद्धंनचचालमहत्तरं॥तदामहाबलेनाथलक्ष्म्यावैदक्षिणेकरे॥चक्राकारं
महाक्षेत्रंविधृतंकरवीरकं॥अनयोःक्षेत्रयोरंगगौरवंलाघवंतथा॥प्रत्यक्षेणसमाज्ञातंकिंपुनर्वन्मिवारत्राः॥अगस्त्युवाच॥क्षेत्रंगौरवमेवंहि
विज्ञायशिवायासह॥सगणोविश्वनाथोपिकरवीरेसुसंस्थितः॥आगतंविश्वनाथंचविज्ञायकाशिकापुरी॥करवीरंसमाश्रित्यतीर्थरूपेणति

क॰मा॰रा॰ ष्ठति॥ गतं विश्वेश्वरं वीक्ष्य मणिकर्ण्यपि कामिनी॥ आगत्य संस्थिता चात्र करवीरे महापुरे॥ आगतं विश्वनाथं हि क्षेत्र तीर्थसमायुतं॥ समागता
१५ नि तीर्थानि त्रिलोकत्रयगतान्यपि॥ अरण्यं सेतुबंधं च कुरुक्षेत्रमतः परं॥ द्वारका गोकुलवरं श्रीशैलादीनि सर्वशः॥ नानाक्षेत्रस्थिता देवाः स्वस्व
क्षेत्रैः समागताः॥ तिष्ठंति यत्र वै सुभ्रु तदिहाख्यातुमक्षमः॥ गणिका यत्र निर्मुक्ता महापापस्वरूपिणी॥ श्रीपापनाशने तीर्थे सर्वपापा
पहारिणी॥ अजामिलो महापापी यत्र मुक्तिमुपेयिवान्॥ दुरितापहारिणे तीर्थे तपस्नानसुनिर्मलैः॥ भगीरथस्य राजर्षेर्यत्र सप्तकुलानि
वै॥ तीर्थे सप्तकुलाद्धारे मुक्तिं जग्मुर्निषेवणात्॥ ब्रह्महत्या गता यत्र श्रीरुद्रस्य महात्मनः॥ कपालं पतितं तस्माद्रुद्रतीर्थे शुचिस्मिते॥ वृ
त्रहत्या महापापादहल्यागमनासुरा॥ इंद्रोप्यत्र विनिर्मुक्तश्चेंद्रकुंडे परार्थदे॥ गुरुदाराभिगमनात्तत्स्त्रीणां त्यागतोपि च॥ चंद्रोपि चंद्रकुं
डे वै निर्मुक्तः स्नानदानतः॥ ऋणत्रयापहारी च सुश्रमेपि द्विजाधमः॥ ऋणविमोचने कुंडे निर्मुक्तः स्नानतर्पणैः॥ नानापापरतः कश्चिदिंद्रसे
नो द्विजाधमः॥ यमयातनानिर्मुक्तः स्नात्वा तीर्थे पिकापिले॥ त्रिःसप्तकृत्वा निर्हत्य क्षत्रियान्भार्गवो बली॥ मातृद्रोहाच्च निर्मुक्तस्तीर्थे
परशुरामके॥ कुष्ठगंडूदिनात्युक्तो ब्रह्महत्यादिकिल्बिषैः॥ शूद्रः कश्चिद्धि निर्मुक्तः स्वग्निकुंडनिषेवणात्॥ गोत्रहत्या महापापैः निर्मु १५
क्ताः पंचपांडवाः॥ श्रीपंचनामके तीर्थे पंचलेश्वरदर्शनात्॥ मिथ्याभिशापसंतप्तो दूर्वासा अपि वै मुनिः॥ मिथ्याभिशापनिर्मुक्तो दूर्वा

सस्तीर्थनिषेवणात्॥ प्रल्हादोपि च वै दैत्यो द्रोहकृतादघात्॥ प्रल्हादाख्ये सुतीर्थेपि निर्मुक्तस्तेन पाप्मना॥ नारदो दक्षशा
पेन स्थातुं क्वापि न यः प्रभुः॥ गोमतीसंगमे स्नात्वा कृष्णदर्शनतत्परः॥ शापघ्नभावनिर्मुक्तः सुखमत्र स तिष्ठति॥ शापयत्र न वै सुभ्रु बाधंते
न्यत्र संभवाः॥ तत्क्षेत्रे येच संसेवंते ते धन्या मनुजा भुवि॥ कृतेथाष्टचत्वारिंश योजनं क्षेत्रमुत्तमं॥ तदंतर्गतकीटादि देवान्सर्वे पुनाति हि॥ त्रेतायां
तु तदर्धं न पुनाती दं जगत्त्रयं॥ द्वापरे चापि वै सुभ्रु तदर्धं क्षेत्रमुत्तमं॥ कलौ षड्योजनं क्षेत्रमिहामुत्रफलप्रदं॥ पंचक्रोशविशेषेण पवित्रं क्षेत्र
मुत्तमं॥ पंचक्रोशांतरे यात्रैये वै तिष्ठंति मानवाः॥ सर्वे ते यांति निर्मुक्ता भवंति स्वर्गगामिनः॥ तत्रापि क्रोशभूमिकं हि पावनं क्षेत्रमुत्तमं॥ यत्र ब्रह्मा
दयो देवा वासमिच्छंति सर्वदा॥ देव्यालयस्य या भूमिर्या योनिकटवतश्नी॥ भवेत्सातिपवित्रा वै कामधेनुरिवार्थदा॥ श्रीमुक्तमंडपे देव्याकृतं दत्तं तथा
कृतं॥ अनंतं जायते सुभ्रु तद्वान्यत्तीर्थमुत्तमं॥ नीराजनविधानेन देवा ब्रह्मपुरोगमाः॥ करतालसमायुक्ताः त्रिकालं सावधानिनः॥ उदयं प्रतिगर्जंतो
जयशब्दविशेषतः॥ कात्यायनी महादेवी नवकोटिसखीयुता॥ दीपान्प्रज्वाल्य वै सुभ्रु पात्रे हाटकनिर्मिते॥ प्रत्येकं नवकोटिस्ता कात्यायन्यो महास्व
नैः॥ उदयं प्रतिगर्जंत्यो देवीं नीराजयंति हि॥ योगिन्यश्चापि तत्काले चामरं व्यजनैर्युताः॥ चतुःषष्टिसमायुक्ताः प्रत्येकमुदयस्वनैः॥ त्रिकालं हि सु
सेवंते सावधानाः पृथक्पृथक्॥ भैरवाद्या गणाः सर्वे दंडपाणिपुरःसराः॥ भेरीदुंदुभिढक्काद्यैर्वादित्रैः संयुताः पृथक्॥ छत्रयानयुताः सर्वे जये

दयस्वनेर्युताः॥सेवंतिकिंकरीभूताः नीराजनविधौ पृथक्॥येवैपश्यंतिकालेपिनीराजनविधिंपरं॥सफलंजन्मवैतेषांवासिनांकरवीरके॥ये
वैपश्यंतिचानंदब्रह्माद्येस्त्रिदशैःकृतं॥तेधन्यामनुजाःसुभ्रुसत्यंसत्यंवदाम्यहं॥स्तेनःसुरापोमित्रघ्नोब्रह्महागुरुतल्पगः॥स्त्रीराजपि
तृगोहंतायेचपातकिनोपरे॥सर्वेतेप्यत्रपूयंतेवसंतःकरवीरके॥बहुवर्तिसमायुक्तंज्वलंतंदेवतोपरि॥कुर्याद्दारात्रिकंयस्तुकल्पकोटिदि
वंवसेत्॥नैवेद्यसमयेदेवीयःपश्यतिविमूढधीः॥सर्वापराधमलिनोदंड्योसोयमकिंकरैः॥नीराजनविधिंयेवैनिरीक्षंतेत्रिकालिकं॥देवीप
श्यंतियेनित्यंकरवीरनिवासिनः॥नीराजनविधौतेहियांतिविष्णोःपरंपदं॥करवीरवासिनांसुभ्रुमुख्यकर्मद्वयंभवेत्॥नीराजनविधेः
सम्यक्त्रिकालदर्शनंपरं॥भिक्षाप्रपाननंचैवश्रद्धयासर्वयोनिषु॥क्षेत्रमध्येतुयत्पापंवासिभिःसमुपार्जितं॥तत्सर्वंहरतेतेषांभिक्षानीरा
जनेविधिः॥धर्मद्वयमिदंचार्यवासिनांयदुदीरितं॥नाचरद्यस्तुमंदात्मानस्यवासफलंकुतः॥पत्रपुष्पांजलिंवेदाश्चत्वारोमूर्तिधारिणः॥
नानामंत्रप्रघोषेणदद्याद्दद्युर्निरंतरं॥येत्रपुष्पांजलिंनित्यंप्रवदंतिविपश्चितः॥दैवेदपारगाःसर्वेप्रपुनंतिकुलत्रयं॥मत्तमंडपिकामध्येये
कुर्वंतिसुकीर्तनं॥तेधन्यामनुजानित्यंसर्वान्कामानवाप्नुयुः॥मुक्तमंडपिकामध्येक्षेत्रमहात्म्यमुत्तमं॥पुराणान्यपिचान्यानिशृण्वंतिश्रा १६
वयंतिच॥कामक्रोधविनिर्मुक्ताभुक्तिमेष्यंतितेनघाः॥मुक्तिमंडपिकामध्येयेनृत्यंतिनरोत्तमाः॥चक्रांगक्षेपणाद्यापिमुर्च्छंतेनेंहसोखिला

न्॥योगीतवाद्यनृत्यानिमोत्स्यंदत्वातुकारयेत्॥सभाक्रभवनेतिष्ठेद्यावदाभूतसंप्लवं॥देवतायेद्विजाग्रेवायोनृत्यंतुप्रकारयेत्॥विनोदयं
तितंसर्वेनित्यमप्सरसांगणान्॥गीतवादित्रनिर्घोषंदेवदेवस्यकारयेत्॥घटाभवेद्धृशंनास्यसर्ववाद्यमयीयतः॥अहोविश्वेश्वरीक्षेत्रेम
रणादपिनोभयं॥यत्रसर्वेप्रतीक्षंतेमृत्युंप्रियमिवातिथिं॥कामदंहिसकामानांनिष्कामानांचमुक्तिदं॥नान्यदृष्टंमयाक्षेत्रंकरवीरपुरंवि
ना॥पराशरोमुनिर्ज्ञात्वाक्षेत्रमाहात्म्यमुत्तमं॥समागतोथसुश्रोणिसकामःकाममाप्नुयात्॥१२०॥इतिश्रीपाद्मेमहापुराणेकरवीरमा
हात्म्येअगस्तिलोपामुद्रासंवादेषष्ठोध्यायः॥ ॥नारदउवाच॥श्रुत्वेवंक्षेत्रमाहात्म्यंलोपामुद्राथवैमुनिं॥पुनःपृच्छत्सासुभ्रुर्गर्जेतंपथि
तंप्रियं॥लोपामुद्राउवाच॥पराशरोमुनिश्चात्रकिंकामःसमगान्मुने॥कृतंवातेनकिंचात्रतत्सर्वंब्रूहिमेप्रिय॥नारदउवाच॥इतितस्य
श्वसत्हृष्टोभगवान्सघटोद्भवः॥प्रभावस्यश्लक्ष्णयावाचाप्रवक्तुमुपचक्रमे॥अगस्त्युवाच॥वयंधन्यधतमालोकेमार्गेप्रासकथानके॥
अध्यथमन्नजानीमापत्सेवनपराःप्रिये॥करवीरकथापुण्यासर्वलोकमलापहा॥वासनापधनोत्येषांतत्क्षेत्रवसतिर्यथा॥नतथा
प्रियेतसुभ्रुलत्करामृतसेवनात्॥क्षेत्रप्रभावश्रुतायद्धदात्मभयःप्रसीदति॥यत्सेवयाममभवेन्नतृषानतिद्रानैवक्षुधानश्रमएवचान्यः॥
तेद्देभवंतुकरवीरकथामृतंसत्सर्वजनाविरहशोकभयापहंयत्॥शृणुदेविवरारोहेपराशरागमकारणं॥तदाश्रमकथांचापियथावत्कथ

याम्यहं॥विछुनातुलितंक्षेत्रं।करवीरपुरं महत्॥श्रुत्वा पराशरोभ्यागान्नैमिषारण्यतःपरे॥कलिंसमागतं वीक्ष्यसर्वबुद्धिविनाशनं॥
चिंतयामासदैवज्ञःसर्वलोकहितायसः॥सहस्रशाखयायुक्तोवेदोयंजगतीतले॥कथंप्रथेतलोकेषुस्वल्पायुष्येषुचैवहि॥अल्पंज्ञे
ष्वल्पसत्वेषुचाल्पपुण्येषुवैतथा॥पुराणान्यपिसर्वाणिचेतिहासाःसहस्रशः॥स्मृतयश्चमहापुण्याःकोवासंप्रार्थयिष्यति॥विनाविष्णु
हिकर्मेदंकोवाकर्तुंसमुत्सहेत्॥नादृश्यंपुत्रमेकंहियाचेहंसर्वदंहरिं॥पूरयिष्यतिमेकामंहरिभक्तिःप्रियःपरः॥शक्यतेनरसीकर्तुंतपसा
राधनेनच॥इतिसंचिंत्यसुदृढंतपाभूमिंविचार्यच॥समागतस्ततोभद्रेकरवीरपुरंमुनिः॥नानापुण्यचनाकीर्णंसर्वामरनिषेवितं॥स
तीर्थनिकराकीर्णंबहुदेवालयान्वितं॥रत्नस्फटिकपाषाणैःकृतदुर्गसुदुर्गमं॥गोपुरैर्विविधाकारैर्बहुशोभाकरंचिरं॥कृतविद्रुमसोपा
नंकृतमार्त्तिकभूमिकं॥गंगाह्वयेनासमंतापरिवीकृतवत्सरं॥उत्तरेकृष्णयाचाथवारुण्यासुदृढीकृतं॥पूर्वेपिकृष्णयादेव्यागायाक्यावापियं
त्रितं॥दक्षिणेवेदपक्षिण्यांनदीभ्यांचसुरक्षितं॥पश्चाच्छिवमयूरीभ्यांनदीभ्यांसुदृढीकृतं॥महाद्वारेषुचत्वारिसंतिलिंगानिचिंतने॥प
र्वतोपरिपूर्वेचलिंगंरामेश्वराभिधं॥कल्लेशंचमहालिंगंस्थितंपश्चिमभागके॥उत्तरेतुयथाभागेश्रीगुप्तंमल्लिकार्जुनं॥मध्यद्वारेषुसं १७
त्यत्रदवतास्थानिबोधय॥उज्वलंवास्थितापूर्वेयाम्येकात्यायनीस्थिता॥पश्चिमेतुविभागेवेश्रीसिद्धेशंप्रकीर्तितं॥उत्तरेदिग्विभागेचश्री

केदाराभिधंस्थितं॥समंतादष्टलिंगैर्यद्दिव्यैश्चप्रतिभूषितं॥अमरेशाभिधंलिंगंपूर्वेकृष्णातटेस्थित॥कोपेश्वराभिधंलिंगंअग्नि
कोणेसुसंस्थितं॥वीरभद्रंमहालिंगंदक्षिणेनतुसंस्थितं॥सिद्धसांख्येश्वरंलिंगंनैर्ऋत्यांदिशिसंस्थितं॥श्रीभोगेशंमहालिंगंपश्चिमेतु
सुसंस्थितं॥वटेश्वराभिधंवायुकोणेयुसंस्थितंपरं॥उत्तरेस्थितरामेशंकृष्णातटसुसंस्थितं॥ईशान्येसंगमेशंचकृष्णावरुणासंगमे॥इ
तिलिंगाष्टकेनाथयत्क्षेत्रंसुदृढीकृतं॥जलशायीचतुष्कोणेसमंतायत्क्षरक्षितं॥पूर्वेचौदुंबरेतीर्थपूर्वाब्धिरितिविश्रुत॥शेतेनंतःसुपर्य
केक्षेत्ररक्षानचक्रकः॥उत्तरेश्वत्थकेतीर्थेदुत्तराब्धिरितिश्रुते॥शेतेनंतःसुपर्यंकेक्षेत्ररक्षानचक्रकः॥एवंसंक्षितंसर्वक्षेत्रंयत्करवीरकं॥ र
देव्याचाथमहालक्ष्म्याधृतंयद्दक्षिणेकरे॥दातुंभक्तजनानांहिभुक्तिमुक्तिमिवप्रियं॥तत्क्षेत्रंप्रभवदृष्ट्वापरमानंदनिर्भरः॥अहोमदीये
स्फुरितंकिमद्यस्थितंकृतंपूर्वमिहस्फुटंतत्॥दृष्टंमयेतत्करवीरकंपुरंब्रह्मेंद्ररुद्रप्रमुखैर्विमृग्यं॥दिष्टंमयाक्वापिनचेदृशंवैक्षेत्रंपवित्रंज
गतीतलेन्यत्॥मुनींद्रवृंदंसिकतास्वरूप्यहाविहायपूर्वेकरवीरकंपुरं॥विलोकितान्यत्रबहूनितानिमुनींद्रवृंदैःकरवीरकेपुरे॥यत्रासमंता
त्सतिभांतिवृक्षादेवस्वरूपाहिमहद्विचित्रं॥दृष्टान्यनेकान्यवनीतलेमयातीर्थान्यथाप्यत्रमनोविमग्नं॥जलंपवित्रंचशिवस्वरूपंदृष्टंयथै
वात्रविभात्यपूर्वं॥यद्भुक्तिदंतन्नविमुक्तिदंक्वचिद्यन्मुक्तिदंतन्नविभुक्तिदंक्वचित्॥क्षेत्रंमयाचोभयदंविचिन्वतानदृष्टमन्यत्करवीरतोम

हत्वा॥धन्यंमदीयंचरणद्वयंवैधन्यंमदीयंननुदृष्टियुग्मं॥जन्माद्यधन्यंकिल्विहाद्यवर्ण्यंदृष्टंमयायत्करवीरकंपुरं॥अगस्त्यउवाच॥पराशरो
मुनिश्चैवंवदन्प्रमुदिताननः॥समागतोथवासुभ्रुप्रयागंवालखिल्यकं॥मार्गेद्वारस्थितान्देवान्संपूज्यविधिपूर्वकं॥गंधाक्षतसुपुष्पा
द्यैःसन्नतिप्रार्थनैरपि॥तिसृणांचेहगंगानांसंगमोयत्रविद्यते॥क्षेत्रवायव्यदिग्भागेतत्प्रयागमितीरितं॥श्रीब्रह्मरूपिणीकुंभीभ
द्रायाविष्णुरूपिणी॥शिवयाशिवरूपिण्यासंगतातत्प्रयागकं॥यत्रचानुदिनंब्रह्मासर्वदेवसमन्वितः॥ब्रह्मयज्ञंप्रकुर्वाणोब्रह्मय
ज्ञंकरोत्यनु॥स्नानदानपरैस्तत्रवासिभिर्ब्रह्मरूपिभिः॥सघोषःश्रूयतेद्यापिपुण्यवद्भिःक्वचित्क्वचित्॥स्नानंकृत्वामुनिस्तत्रतीर्थश्रा
द्धंविधायच॥गोभूतिलहिरण्यादियथाशक्त्याप्रदत्तवान्॥पितॄन्संतर्प्यविधिवत्कृत्वामाधवदर्शनं॥कपाटस्वामिनंपूज्यपत्न्यासहवटं
गतः॥वटंसंपूज्यविधिवत्सावित्रीवटसंस्थितां॥कुंकुमांजनगंधाद्यैरुपचारैरपूजयत्॥वटंसंवेष्टयन्नवभिस्तंतुभिःसुमनोरमैः॥कंचुका
युक्पर्णादिदत्वातत्रप्रणम्यच॥ततोजगाममसमुनिःकरवीरंमहापुरं॥मलापकर्षणंस्नानंकाश्यांकृत्वावरानने॥नत्वाविश्वेश्वरंदेवंभ
वानींविश्वमातरं॥विनायकंततोनत्वातथाचदंडपाणिनं॥नत्वाचत्र्यंबिकांदेवीवाराहींनदनंतरं॥ब्रह्माणंचततोनत्वाविष्णुंचैवततःपरं॥ १९
शिवंनत्वातथासम्यक्अविमुक्तेश्वरंततः॥कुंडेशंप्रणम्यनमस्कृत्यनत्वानंदीश्वरंततः॥स्नात्वाथमणिकर्ण्यांवैमणिकर्णेश्वरंततः॥कुर्कुटेशंनम

स्कृत्यतथान्यानपिसर्वशः॥दत्तात्रेयमुनेश्चाथपादुकेसंप्रणम्यच॥मुक्तमंडपिकांदेव्याविविशाथमुनीश्वरः॥विनायकंचरुद्रंचसंपूज्य
विधिवत्ततः॥कालवेतालकौपूज्यद्वारपालौमहाबलौ॥दिव्यादत्तवरोदर्कौपूजितौसर्वकामदौ॥गर्भगृहंसमासाद्यमहादेवींप्रणम्य
च॥गंधपुष्पसुवस्त्राद्यैर्महालक्ष्मींप्रपूज्यसः॥पुष्पांजलिंप्रदत्वाचप्रणनामसदंडवत्॥नमोदेव्यैमहालक्ष्म्यैशिवायैसततंनमः॥नमः
शिवायैभद्रायैनियताःप्रणताःस्मतां॥६६॥इतिश्रीपाद्मेपुराणेकरवीरमाहात्म्येअगस्तिलोपामुद्रासंवादेसप्तमोध्यायः॥ ॥अग
स्त्यउवाच॥नत्वाचैवमहालक्ष्मींमनोवाक्कायकर्मभिः॥कृतांजलिपुटोभूत्वास्तुतिंकर्तुमुपक्रमः॥पराशरउवाच॥नमाम्यहंदेववरांप
वित्रांजगत्कृतिस्थामविरोधसंभवां॥भुक्तिप्रदामस्तकुलस्यसर्वदामुक्तिप्रदांप्राज्ञकुलस्यसत्पतनः॥तवप्रभावंमुनिरूपितंशुभेपराक्रमंवानहि
देववंदैः॥अलंप्रसीदेश्वरिसर्वदेहिनांकामप्रदात्वंभवसर्वकामिनां॥नूनंस्थितात्वंकरवीरकेपुरेमुक्तिंप्रदातुंखलुसर्वदेहिनां॥तथापियाचेभ
वतीसुरार्तिहांमनोरथंसुंदरिपूरयाशुभे॥यांवैरिणांवितनुतेभवतीविमुक्तिंसाकिंददातिनहिसज्जनभक्तवृंदे॥सर्वात्मनातवपदाब्ज
कथासुतृसभृंगोभवच्चरणपंकजवासदक्षे॥धन्योस्मिकृतकृत्योस्मितवपादाब्जदर्शनात्॥संसारभयभीतोस्मिपाहिमांसर्वशर्मदे॥
सुदिनंचाद्यसंजातंप्राप्तंजन्मफलंमया॥मातस्त्वद्दर्शनाद्देवजातःसर्वमनोरथः॥नयाचेवरमन्यंहिपूर्णचंद्रनिभानने॥त्वत्क्षेत्रवसतिं

देहि सर्वकामप्रपूरयीं ॥ अगस्त्य उवाच ॥ मुनिनैवं स्तुता देवी सर्वाभिष्टफलप्रदा ॥ प्राह प्रसादसुमुखी मुनिं पाराशरं शुभे ॥ महालक्ष्म्यु
वाच ॥ धन्योसि कृतकृत्योसि मुने मत्क्षेत्रदर्शनात् ॥ मत्क्षेत्रदर्शनं नॄणामिहामुत्रफलप्रदं ॥ देवद्विजद्रुहां चात्र वासं नैव ददाम्यहं ॥ वेदधर्म
द्रुहां चापि क्षेत्रवासिद्रुहामपि ॥ परनिंदारतानां च कृतघ्नानां तथैव च ॥ नैव वासं ददाम्यत्र मिथ्याभिशापिनामपि ॥ त्वं शांतः श्रद्धयायुक्तः सत्यवा
न्विजितेंद्रियः ॥ निवसात्र सुखं ब्रह्मन्यत्र ते मनसो रुचिः ॥ वासस्ते सर्वदात्रास्तु संपूर्णाः संतु कामनाः ॥ पंचक्रोशांतरे यो वै यत्र त्वं हि वसिष्यति ॥
तत्र तत्र भवेत्तीर्थं त्वन्नाम्ना विश्रुतं भुवि ॥ यथाविधि तपस्त्वा सर्वान्कामानवाप्नुहि ॥ अगस्त्य उवाच ॥ गृहीत्वाथ वरं नत्वा महालक्ष्मीं स चैव मुनिः ॥ मु
क्तिमंडपमागत्य श्रुत्वा धर्मकथाः शुभाः ॥ नीराजनविधिं दृष्ट्वा सर्वकामप्रदायिनं ॥ क्षेत्रपश्चिमभागे तु क्रोशयुग्मांतरेण वै ॥ स्थितः पर्णकुटीं कृत्वा स
शाहं सुविचक्षणाः ॥ तत्राभवन्महातीर्थं तपोयोगसमुद्भवं ॥ वरप्रभावतो देव्याः पराशरमितीरितं ॥ तन्नाम्नैवाभवल्लिंगं पावनं सर्वदेहिनां ॥ स्नात्वा स
र्वेषु तीर्थेषु कोटितीर्थादिषु क्रमात् ॥ दक्षिणे चोत्तरे वापि मानसे तु विधानतः ॥ अंतर्गृहे बहिर्वाथ स्नात्वा चैव यथाविधि ॥ काशीक्षेत्रविधिं कृत्वा गया
क्षेत्रं ततो गतः ॥ क्षेत्रस्येशानदिग्भागे क्रोशार्द्धांतरसंस्थितं ॥ गयाक्षेत्रं हि विज्ञेयं सर्वतीर्थफलप्रदं ॥ कांक्षंति पितरः पुत्रान्नरकाद्भयभीरवः ॥ गयां १९
यास्यति यः पुत्रः स नस्त्राता भविष्यति ॥ गयाप्राप्तं सुतं दृष्ट्वा पितॄणामुत्सवो भवेत् ॥ पद्भ्यामपि जलं स्पृष्ट्वा सोस्मभ्यं किं न दत्तवान् ॥ गयां दत्त्वान्न

दानाय यः पितरस्तेन पुत्रिणः ॥ पक्षत्रयनिवासी च पुनात्यासप्तमं कुलं ॥ महाकल्पकृतं तापं गयां प्राप्य विनश्यति ॥ पिंडं दत्वा च पुत्रादेः आत्मनोपि
तिलैर्विना ॥ आत्मजो प्यन्यजो वापि गयाभूमौ यदा तदा ॥ यन्नाम्ना पातयेत्पिंडं तन्नयेद्ब्रह्म शाश्वतं ॥ ब्रह्मज्ञानं गयाश्राद्धं गोग्रहे मरणं तथा ॥ वा
सः पुंसां कुरुक्षेत्रे यदि पुत्रो गयां व्रजेत् ॥ ब्रह्मज्ञानेन किं साध्यं गोग्रहे मरणेन किं ॥ वासेन किं कुरुक्षेत्रे यदि पुत्रो गयां व्रजेत् ॥ मया प्रकल्पितान्विप्रा
न्हव्यकव्यादिनार्चयेत् ॥ तैस्तु तुष्टैस्तोषिताः सर्वाः पितृभिः सह देवताः ॥ दंडं प्रतापयेद्भिक्षुर्गयां गत्वा न पिंडदः ॥ दंडं न्यस्त्वा रुद्रपदे पितृभिः सह मुक्तये ॥
रुद्रपदाच्च पूर्वस्मिन्दक्षिणे पश्चिमोत्तरे ॥ सार्धक्रोशद्वयं मानं तयोरीड्डीति विश्रुतं ॥ पंचक्रोशं गयाक्षेत्रं क्रोशमेकं गयाशिरः ॥ तन्मध्ये सर्वतीर्था
नि त्रैलोक्ये यानि संति वै ॥ श्राद्धकृतो गयाक्षेत्रे पितृणापितृणामनृणो हि सः ॥ शिरसि श्राद्धकृद्यस्तु कुलानां शतमुद्धरेत् ॥ गृहाच्चलितमात्रेण गया
यां गमनं प्रति ॥ स्वर्गारोहणसोपानं पितॄणां च पदे पदे ॥ पदे पदेश्वमेधस्य यत्फलं गच्छतो गयां ॥ तत्फलं च भवेन्नॄणां समग्रं नात्र संशयः ॥ पायसेना
थ चरुणा सक्तुना पिष्टकेन च ॥ तंदुलैः फलमूलाद्यैः गयायां पिंडपातनं ॥ गयायां पिंडदानेन यत्फलं लभते नरः ॥ न तच्छक्यं मया वक्तुं कल्पकोटिशतै
रपि ॥ मुंडनं चोपवासं च सर्वतीर्थेष्वयं विधिः ॥ वर्ज्जयित्वा कुरुक्षेत्रं विशालं विरजं गयां ॥ गयायाश्च प्रवेशे तु स्नातव्यं फल्गुतीर्थके ॥ देवादींस्तर्पयित्वा
थ श्राद्धं कृत्वा स्वसूत्रतः ॥ अपरेह्नि शुचिर्भूत्वा गच्छेत्प्रेतपर्वतं ॥ रुद्रकुंडे ततः स्नात्वा देवादींस्तर्पयेत्सुधीः ॥ कृत्वा श्राद्धं सपिंडं च प्रयतः प्रेतपर्वते ॥

क र० मा० येकेचित्प्रेतरूपेण वर्त्तंते पितरो मम। ते सर्वे तृप्तिमायांतु सक्तुभिस्तिलमिश्रितैः॥ फल्गुतीर्थे व्रजस्तस्मात्सर्वतीर्थोत्तमोत्तमं॥ मुक्तिर्भवेत्पि
२० तृणां च कर्तृणां चैव शाश्वती॥ तीर्थान्यपि च सर्वाणि भुवनेषु वसंति च॥ तानि स्नातुं समायांति फल्गुतीर्थे सुरैः सह॥ गंगापादोदकं विष्णोः फ
ल्गुत्वादिगदाधरः॥ स्वयं हि द्रवरूपेण तस्माद्गंगाधिकं विदुः॥ अश्वमेधसहस्राणां सहस्रं यः समर्पयेत्॥ नासौ तत्फलमाप्नोति फल्गुतीर्थाभिषे
चनात्॥ फल्गुतीर्थे नरः स्नात्वा दृष्ट्वा देवं गदाधरं॥ आत्मानं पितृभिः सार्धं नयेत्स वैष्णवं पदं॥ अमृतैः पंचभिः स्नानं पुष्पवस्त्राद्यलं कृतं॥ न कुर्या
द्योगदापाणिस्तस्य श्राद्धमपार्थकं॥ प्रथमेह्नि विधिः प्रोक्तो द्वितीयदिवसे व्रजेत्॥ धर्मारण्यं यत्र धर्मो यस्माद्यागमकारयत्॥ धर्मं धर्मेश्वरं न
त्वा महाबोधितरुं नमेत्॥ तृतीये ब्रह्मसरसि गत्वा स्नानं समाचरेत्॥ कृत्वा ब्रह्मसरः श्राद्धं ब्रह्मलोकं नयेत्पितॄन्॥ आम्रो वै रोपितास्तत्र ब्र
ह्मलोकस्य पावनाः॥ तेषां सेवनमात्रेण पितरो मोक्षगामिनः॥ ततो यमबलिं दद्याद्यमस्य तृप्तिहेतवे॥ ततः श्वानबलिं दद्यात्तत्तन्मंत्रैर्यथाविधि पृथक्॥
ततः काकबलिं दत्वा पुनः स्नानं समाचरेत्॥ फल्गुतीर्थे चतुर्थेह्नि सुस्नानादि समाचरेत्॥ गयारस्य पथश्राद्धं पदे कुर्यात्सपिंडकं॥ गदाधरं तु सं
पूज्य व्यक्ताव्यक्तात्मनास्थितं॥ रुद्रादिपदरूपेण पितॄणां तृप्तिहेतवे॥ तत्र रुद्रपदं दिव्यं दर्शनात्पापनाशनं॥ स्पर्शनात्पूजनाद्वापि पितॄणां द २०
त्तमक्षयं॥ श्राद्धं सपिंडकं कृत्वा पदे विष्णोर्महात्मनः॥ सहात्मानं कुलशतं नयेत्तत्परमं पदं॥ तथा ब्रह्मपदे श्राद्धं कृत्वा पूर्वविधानतः॥ ब्रह्मलोकं कु

लशतं समुद्धृत्य नयेन्नरः॥ कार्त्तिकेयपदे श्राद्धं शिवलोकं नयेत्पितॄन्॥ गणेशस्य पदे श्राद्धे शिवलोके नयेत्पितॄन्॥ गयाशिरसि यः पिंडान्येषां
नाम्ना प्रपातयेत्॥ नरकस्था दिवं यांति स्वर्गस्था मोक्षमाप्नुयुः॥ ततो भूरिप्रदानैश्च ब्राह्मणान्पूजयेन्नरः॥ संतुष्टे ब्राह्मणे स्तत्र गयाश्रा
द्धं हि साम्यकं॥ आश्वपाकादिभूतानि यथावत्तोष्यत त्रहि॥ सफला भवयात्रेति तेषां वाक्यं प्रगृह्य च॥ ततो गच्छेद्वटं दिव्यं यमक्षय्यं विदुर्बु
धाः॥ तन्नाम प्रथिते तीर्थे स्नात्वा चैव यथाविधि॥ ब्रह्मप्रकल्पितान्विप्रान्भोजयेत्पूजयेत्ततः॥ अक्षय्ये च वटे तत्र श्राद्धं कृत्वा विधानतः॥
वटवृक्षसमीपस्थो ब्राह्मणेनाप्युदकेन वा॥ एकस्मिन्भोजिते विप्रे कोटिर्भवति भोजिता॥ दृष्ट्वा नत्वाथ संपूज्य वटेशं च समाहितः॥ पितॄन्नयेद्ब्रह्मलो
कमक्षय्यं च सनातनं॥ संसारवृक्षशास्त्राय शेषपापहराय च॥ अक्षय्यब्रह्मदात्रे च नमोक्षय्यवटाय ते॥ इति श्रीपाद्मे कर वीमाहात्म्ये करवी
रकांडे अगस्तिलोपामुद्रासंवादे गयामाहात्म्यं नाम अष्टमोध्यायः॥ ॥अगस्त्य उवाच॥ एवं गयाविधिं कृत्वा त्रिस्थलीसमुपास्य सः॥ महालक्ष्मीं
प्रणम्याथ द्वाराण्यालोक्य सर्वतः॥ महालिंगाष्टकं पश्यन् जाजगाम पराशरः॥ गिरिं ब्रह्माभिधानं च क्षेत्रवायव्यभागतः॥ यत्र ब्रह्मा तपस्तेपे प्रजा
सर्गार्थमादृतः॥ प्राप्तश्च महतीं सिद्धिं प्रज्ञाश्चैवोपबृंहयत्॥ यत्र संस्थापयामास लिंगं सोमेश्वराभिधं॥ आनीय सर्वतीर्थानि सोमतीर्थं चकार सः॥
वरं च दत्तवांस्तत्र तं ब्रवीमि वरानने॥ अस्मिन्गिरिवरे ये वै करिष्यंति तपो महत्॥ ते सर्वे पापनिर्मुक्ता यांति तत्परमं पदं॥ सकामाः कामभीष्टं तु

क॰र॰मा॰ निःकामा मोक्षमेव च॥ सोमेश्वरं महालिंगं ये पश्यंति सुचेतसः॥ सोमतीर्थे सुसंस्नातास्ते यांति परमं पदं॥ सोमवारे च ये स्नात्वा सोमतीर्थे वि
२१ चक्षणाः॥ दृष्ट्वा सोमेश्वरं लिंगं न ते यांत्यपुनर्भवं॥ ये रुद्रादिमहासूक्तैर्लिंगं सोमेश्वराभिधं॥ अभिषिंचंति ते धन्याः सर्वान्कामानवाप्नुयुः॥ पावमा
न्यैर्महामंत्रैः पौरुषैर्वा विशेषतः॥ ते सर्वपापनिर्मुक्ताः पुत्रपौत्रधनान्विताः॥ बिल्वपत्रैः समर्चंति ये सोमेशं महाशिवं॥ सहस्रनाममंत्रैर्वा ते पुनंति
जगत्त्रयं॥ ये च वासं करिष्यंति श्रीसोमेश्वरसंनिधौ॥ भुक्तिमुक्तिं च ते सर्वे समीयुर्मदनुज्ञया॥ अगस्त्य उवाच॥ इति लब्ध्वा वरं क्षेत्रं पावनं सर्वदेहिनां॥
गिरिं समाप्य योऽदेविस मुनिर्ब्रह्मनामकं॥ चूताम्रपनसाकीर्णं तालशालविराजितं॥ सरलाशोकपालाशभल्लातकसुशोभितं॥ दाडिमीनिंबजं
श्रेषि बीरपिचुमंदमनोरमं॥ जानीयूथकमाल्याद्यैः बहुभिरतिशोभितं॥ सारिकाकिलसंलापैराकर्षंतिमिवागतान्॥ मत्तषट्पदनिर्घुष्टवनमाला
विराजितं॥ सिंहव्याघ्रवनाकीर्णं त्राद्रुलाक्षभयानकं॥ यक्षकिन्नरगंधर्वविद्याधरविभूषितं॥ एवं पर्वतमालोक्य प्रहृष्टहृदयो मुनिः॥ सोमतीर्थेषु
संस्नात्वा कृत्वा श्राद्धं हिरण्मयं॥ पितॄन्संतर्प्य विधिवत्ततो देवालयं गतः॥ उमां देवीं च तत्रादौ संपूज्य विधिपूर्वकं॥ नत्वा चैव गणेशानं क्षेत्रपालं चिरं
चितं॥ एतानभ्यर्च्य विधिवद्गतः सोमेश्वरालयं॥ नत्वा देववरां स्तूर्णमर्चयामास भक्तितः॥ रुद्रेण शतरुद्रेण श्रीरूपेण तथैव च॥ पौरुषैः कुचरुद्रैश्च २१
पावमान्यैर्विशेषतः॥ अभिषिच्य महादेवं गंधाक्षतसुपुष्पकैः॥ धूपदीपोपहारैश्च नानाशारवसमुद्भवैः॥ कृत्वा नीराजनं चैव दत्वा पुष्पांजलिं तथा॥

नानामभुविकायेन साष्टांगं दंडवन्मुनिः॥ कृतांजलिपुटः पश्चात्समुत्थाय महामुनिः॥ अस्तौषीत्सर्वदं शंभुं सोमेशं प्रीतिविक्लवः॥ पराशर उवाच॥
ततोऽस्म्यहं त्वां परिपूर्णमीश्वरं सर्वप्रदं योगिमनोनिवासं॥ सद्भक्तिनम्रैरिषितांघ्रिपद्मं मायामहंसवनतत्सराणां॥ आभासते भासमशेषसाक्षि
न्त्वत्तः प्रभूतं त्वयि संस्थितं च॥ त्वय्येव लीनं न परं पराद्भ्वे प्रलीयते लीनमथापि सत्त्वं॥ विद्वद्भिरेवं प्रतिबुध्य विद्वन्त्वदेकलिंगज्ञानलयं प्रपंचं॥
वातः शरण्यं शरणं भवं तं तेषां हि धन्यं जनं भवाब्धौ॥ भवांधकूपे पतितस्य मे विभो त्वनुप्रकाशं भव दीपसमत्तं॥ आत्मप्रकाशं शोकविनाशदक्षं
यं प्राप्य सर्वे सुनयः प्रतीर्णाः॥ आत्माभिराम वमनीयगुणाभिराम श्रीकामदहनाखिलभोगधाम॥ रामाभिराम भव काम पराभिराम
कामिप्रपूरय कामिजनस्य विठ्ठल॥ अगस्त्य उवाच॥ इति स्तुत्वा महादेवं सोमेशं स पराशरः॥ विलोक्य पर्वतं सर्वं शुचिस्थानं समीक्ष्य च॥ कृ
त्वा तत्राश्रमं दिव्यं दिव्यपक्षिसमायुतः॥ दिव्यशिष्यगणोपेतस्तपस्तप्तुं प्रचक्रमे॥ श्रीहरिं मनसा ध्यायन्नासाग्रकृतेक्षणः॥ विलसच्चारुवदनं
पुंडरीकनलिनेक्षणं॥ हेमकुंडलसंचारविलसद्गल्लमंडितं॥ नीलोत्सुघनश्यामं पीतकौशेयवाससं॥ चतुर्भुजं चित्रमालाक्षं शंखचक्रादिभिर्युतं॥ बु
वनमालापरीतांगं सर्वलक्षणसंयुतं॥ सर्वाभरणसंयुक्तं हरिं ध्यायन्विचक्षणः॥ संनिरुध्येंद्रियग्रामं प्राणान्संनिरुध्य मस्तके॥ एवं बहुतिथं सु
भृकुर्वन्नैतपउत्तमं॥ न ददर्श यदा सिद्धिं वाक्चारोग्रं तपः सदा॥ यदा द्रक्ष्यामि तं विष्णुं स्वरूपेण समागतं॥ तदा पूर्णं करिष्यामि तप एतदिति स्थितः॥ म

क॰ मा॰ हन्तपः समारेभे पर्णभक्षपरायणः ॥ हिमवर्यातपसहो जलशाय्यग्निमध्यगः ॥ सूर्यदृष्टिर्मन्त्रापानतपस्तप्तुं यदोद्यतः ॥ तस्य मूर्धा समुद्भूतः स तपो
२२ ग्निस्तपोमयः ॥ तिर्यगूर्ध्वमधः संस्थः लोकान्दग्धुं यदोद्यतः ॥ तदेंद्रश्चिंतयामास भीतः स्वस्थानशंकया ॥ आरब्धं तप एतेन मल्लोकविजि
गीषया ॥ अन्यथा तप एवायमुग्रं तूष्णीं न चारभेत् ॥ तस्माद्विघ्नः प्रकर्तव्यो यथास्य तप एव हि ॥ शीघ्रं सर्वं प्रणश्येत सुखं स्वस्थ्याम्यहं ततः ॥
इति निश्चित्य वै सुभ्रु महेंद्रः सुभृशार्दितः ॥ आहूय मदनं प्राह मानदो मानयन्बहु ॥ इंद्र उवाच ॥ पंचबाण महाबुद्धे सर्वकार्येषु कोविद ॥ संक
टं मे बहुधा संकरणीयमिहात्र किं ॥ त्वं निर्मितोसि वै धात्रा देवानां रक्षणाय वै ॥ मुख्याणां विशेषेण प्रजार्थे च विनिर्मितः ॥ त्वत्सन्निधानरहितो
मनुष्यो त्यतिगर्हितः ॥ षंढः स उच्यते सर्वैर्हव्यकव्येषु गर्हितः ॥ पाताले पि भवान्शेषो नागकन्याप्रियप्रदः ॥ तस्मात्सर्वेषु लोकेषु त्वद्विनाने
वशो भते ॥ देवानां च विशेषेण साहाय्यं भवतः स्फुटं ॥ शस्त्रद्वयं मम श्रेष्ठं कुलिशं च भवांस्तथा ॥ वज्रं कै मुनिषु कुंठं तु त्वं सर्वसाभिसाधकं ॥ क
तिवारं त्वया पूर्वं तपसोस्मद्विरोधिनः ॥ चालिता भवता वीर देवकार्यविधौ न था ॥ तस्मात्कृत्स्नगिरौ कामतपस्तप्यते वै मुनिः ॥ अस्मल्लोके च्छ
यान्नूनं न रुत्वा त्वं निबर्हय ॥ अगस्त्य उवाच ॥ माहेंद्रं वचश्चाकर्ण्य पंचबाणमुदान्वितः ॥ उवाच स्मयमामानस्तं संप्राप्तावसरस्तदा ॥ मदन उ २२
वाच ॥ किं कार्यमुपदिष्टं मे लघुभूतं पुरंदर ॥ वीरं स्पिवं विधे कार्ये का चिंता तव वृत्रहन् ॥ रुद्रोपि च महाधन्वी चालितस्तपसो मयात् ॥ त्वदाज्ञया

मम स्वामिन्देहि तांबूलमादृतः ॥ प्रेषयाशु वसंतं च दिव्यस्त्रीगणसंयुतं ॥ मंजुलं च तथा वातं गंधर्वप्रवरानपि ॥ अगस्त्य उ॰ ॥ यदुक्तं समरेंद्रोपि यदुक्तं
मदनेन वै ॥ तत्सर्वं प्रतिदत्वार्थं प्रेषयामास तं शुभे ॥ मदनोपि मदायुक्तो त्यप्सरोगणसंयुतः ॥ तूर्णं समागतः सुभ्रु गिरिं श्रत्याभिधानकं ॥ रसातलं
रसालैस्सखर्जूरैः शोकहारिणं ॥ नालिकेरस्तमालैश्च तालैर्हिंतालैः सर्वत्रशालिनं ॥ सुधाफलसमारंभिरंभाभिः परिभावितं ॥ सुरंगैश्चापि नारंगैः रंग
मंडपवल्लिर्यं ॥ वानीयैश्चापि जंबीरैः बीजपूरैः प्रपूरितं ॥ मंदारद्दोलितकर्पूरकदलीदलसंज्ञया ॥ विश्रमाय समायन्नं माकयंतमिवाध्वगान् ॥ पुन्ना
गमिव पुन्नागपल्लवैः करपल्लवैः ॥ केलयंतमिवालोकैर्मल्लिकास्तवकस्तनं ॥ विदीर्णदाडिमैः स्वांतं दर्शयेतिचरागवत् ॥ माधवीधवरूपेण श्लिष्यंत
मिव काननं ॥ कदंबपातिनो भृंगान्दृष्ट्वा कंटकितेरिव ॥ समंततो भ्राजमानं कदंबककदंबकैः ॥ नीराजितमिवोद्दीपैराजचंपककोरकैः ॥ सत्
पुष्पशाल्मलीभिश्च जितपद्माकरश्रियं ॥ क्वचिज्जलदलैरुच्चैः क्वचित्कांचनकेतकैः ॥ नतमालेर्नक्तमालैः शोभमानं क्वचित्क्वचित् ॥ गतन्मयूरकुसुमे
धरारूसहरैर्धनैः ॥ स्वहस्तमुक्तमुक्ताभिरर्चयंतमिवानिशं ॥ नानामृगगणाकीर्णं नानाद्विजनिनादितं ॥ नानासरित्सरिस्रोतः पल्लवैः परितो वृतं ॥ तु
च्छ श्रियः स्वर्गभूमिः परित्यागगतेरिव ॥ नानासुरनिकायैश्च विश्वभोगेच्छया श्रितं ॥ उत्सृजंतमिवार्चैर्वैपतत्सुष्पैरितस्ततः ॥ केकिकेकारवैर्दूरात्कु
र्वंतं स्वागतं किल ॥ वायुना चाप्सरोभिश्च वसंतमदनादयः ॥ जग्मुः पराशरो यत्र तप आस्थाय तिष्ठति ॥ स्वनाम्ना लिंगमास्थाय कुंडं कृत्वा नदस्येतः ॥

महापुरुषस्तुष्टं चजपन्निश्चलमानसः ॥ तं दृष्ट्वा दूरतो देवाद्वितीयमिव भास्करं ॥ ज्वलज्ज्वलनसंकाशैरंगैः सर्वत्र शोभितं ॥ साक्षात्किं वाडवी मूर्त्तिस्स
दुर्यंतपनेन पः ॥ स्थाणुवन्निश्चलतरं निर्मलं सन्मनोरथं ॥ अथवा सर्वतेजांसि श्रित्यैमां ब्राह्मणीं तनुं ॥ त्रीलयं तं परं धाम शांतं शांतपदाश्रयं ॥ तपनस्त
प्ते त्यर्थं दहनोपि च दह्यते ॥ यन्नीवतपसाद्यापि चपलेश्चपलो भवेत् ॥ यस्याश्रमे त्वदृश्यं हि तेस्ना अपि समं ततः ॥ शांतरूपा अमी सत्वास्त्यक्त्वा वैरं
स्वभावजं ॥ शुंडादंडेन करिणः सिंह्यकुंडविनाशकाः ॥ भुजंगस्य फणाघृष्टेन कुलः स्वकुलोद्भवं ॥ वैरं परित्यज्य लुंठेदुत्सेवोत्सवलीलया ॥ आलोक्य
मूषकं सर्पश्चरंतं वदनाग्रतः ॥ क्षुधार्तोपि न गृह्णाति सोपि तस्मादिभेति न ॥ प्रसूयमानां हरिणीं दृष्ट्वाकारुण्यपूर्णदृक् ॥ तं दृष्टिपानमुंचश्च व्या
घ्री दूरं व्रजत्यहि ॥ व्याघ्री व्याघ्रस्य चरितं मृगीमृगविचेष्टितं ॥ उभाव कथतोन्यान्यं सख्या विचमुदान्विते ॥ दृष्ट्वाप्युदंडको दंडदां बरं ग्रां करो मृगः ॥
योधृष्टेव नर्भत्यजति सोपि कंडूयते हितं ॥ बकोपि पल्वले मत्स्यान्नाश्नात्यग्रेचरानपि ॥ न महांतोप्यमहतो मत्स्या मत्स्यान्नदंति च ॥ एकतः सर्व
मांसानि मत्स्यमांसं तथैकतः ॥ स्मृतिस्मृत्येति किंतेभिरतो मत्स्यांस्त्यजंत्यपि ॥ परप्राणैस्तु ये प्राणान्स्वान्पुष्णंति हि पापिनः ॥ आकल्पं नरकान्
भुक्त्वा भुंजते चात्र ते पुनः ॥ जंतुमात्रं न भोक्तव्यं प्राणैः कंठगतैरपि ॥ भोक्तव्यं तद्धि भोक्तव्यं स्वमांसं तेन नरस्य च ॥ लोकद्वयध्वंसकारि धिग्गहो मांसभ २४
क्षणं ॥ यस्त्वार्थं मांसपचनं कुरुते पापमोहितः ॥ यावंति पशुरोमाणि तावत्स नरकं व्रजेत् ॥ इत्येवं सर्वशास्त्राणि न हिंसंति परस्परं ॥ अहो सत्संग

माहात्म्यं पशूनां सन्मतिः कथं ॥ ज्ञातो वै मुनिसंगेन धन्यापि पशवस्त्वमी ॥ इत्याश्रमचरान्दृष्ट्वा तिर्यंचोपि मुनीनिव ॥ अबोधि विबुधैरित्थं प्र
भावः क्षेत्रजस्त्वयं ॥ मृगाणां पक्षिणामित्थं दृष्ट्वा चेष्टां त्रिविष्टपं ॥ अकांडपातसंकृष्टं निनिंदस्त्रिदशा बहु ॥ वरमेते पक्षिगणाः पशवः क्षेत्रवासि
नः ॥ येषां न पुनरावृत्तिर्न देवास्तु पुनर्भवाः ॥ अत्रस्थैः पक्षिभिस्तुल्याः न वयं स्वर्गिणः क्वचित् ॥ अत्र पातभयं नास्ति स्वर्गे पातभयं महत् ॥ करवीर
पुरे वासो वरं चोपोषणादिभिः ॥ विचित्रचित्रसुखश्चायं राज्यं नान्यत्र शोभते ॥ शशांके मेशंकेरत्रयस्तदंहेलयाप्यते ॥ तत्पदं नाप्यते न्यत्र योगयुक्तैः
सयोगिभिः ॥ शुक्लपक्षे यथा चंद्रः कलया कलयैधते ॥ करवीरे त्र वसतां धर्मराशिः पदे पदे ॥ इति श्रीपद्मपुराणे करवीरमाहात्म्ये अगस्तिलोपा
मुद्रसंवादे मदनाद्यागमनं नाम नवमोध्यायः ॥ ॥ अगस्त्य उवाच ॥ इत्थं वदंतो बहुधा क्षेत्रमाहात्म्यमद्भुतं ॥ कामवाय्वादयः सर्वे स्वंस्वं रूपं स
माचरन् ॥ वनो वायुः सुखस्पर्शः मंदः शीतसुगंधवान् ॥ स्पर्शमात्रेण येन नृणां मनः संविरहं श्रितं ॥ वसंतागमने नेवप्रफुल्ला वनराजयः ॥ गभीरं
हि स्वनं चक्रुः षट्पदाः पुष्पवासिनः ॥ तथा स्वनं पिकास्तत्र ऋषिमानसदारणं ॥ योगिनां मानसं चापि कुर्वंतः कामलंपटं ॥ गंधर्वा गायनं चक्रुः
नानाश्रुतिसमन्वितं ॥ स्वर्देव्यो ननृतुस्तत्र चलत्कुचमनोरमा ॥ वलितैः पलितैश्चापि क्लमस्वेदविवर्जिताः ॥ हासभ्रूक्षेपणालोपैः हस्तलास्यसुन
र्तनैः ॥ हरंत्यो मानसं सर्वाः सर्वेषां पश्यतां द्रुतं ॥ कयक्षप्रहितैर्बाणैर्निघ्नंत्यः सर्वमर्मसु ॥ विमोहयंत्येस्तच्छात्रानस्मानपि मुनीश्वरान् ॥ मदनोप्य

थबाणंस्त्वं दूरे स्थित्वा विशंकितः॥ मुने श्चिक्षेप वै नैवेवम विषह्यं सुरादिभिः॥ क्षिप्तमाहात्म्यतो देवि मुनिर्वै नैव चालितः॥ महतस्तपसो नूनं मदनेन दु
रात्मना॥ मत्वा चाथ महाश्चर्यं मनं गस्यत्वथाश्रमः॥ द्वितीयं संदधे बाणं तपसश्च किर्तं मुनिः॥ भग्नाशः समभून्मत्वा बाणं तं चापि विस्मितः॥ तृतीयं संद
धे बाणं येन रुद्रो वशीकृतः॥ चालयिष्यत्ययेनैनेनं मुनिं चेति सुनिश्चितः॥ रुद्रस्यापि मनो मोही बाणोयमिति संदधे॥ सर्वशास्त्रास्त्रभेत्तायं सक
थं निःफलो भवेत्॥ इति निश्चित्य वै सुश्रु बाणमस्मिन्न्यचिक्षिपत्॥ तेन बाणेन निर्भिन्नहृदयः स पराशरः॥ दृष्टिमुन्मील्य वै सुश्रु परितः समपश्यत॥ तदा
स दृष्टवान् सर्वमाश्रमे सुमनोरमं॥ रंभामारुह्यायतत्रैव सर्वे वायुपुरोगमाः॥ निलीनाः सर्व एवैते मुनिशापसुविह्वलाः॥ अपूर्वं स्वाश्रमं दृष्ट्वा दृष्टारं
भां सुमध्यमां॥ रंतुं कर्तुं मनो यावत्तावत्सोऽत्र प्रभावतः॥ गतिर्जज्ञे मुने स्तस्य कामक्रोधविनाशनी॥ कोहं केयं कुतः प्राप्ता तपोनाशसमुद्यत॥ भागाद्दा
त्रापत्तो वाथ सर्वमेनाशइष्यति॥ इति निश्चित्य स मुनिस्तां प्रोवाच बिभीषयन्॥ गच्छ दुष्टे न चेत्त्वां भस्मसात्त्वां करोम्यहं॥ शापादपि तपोनाशं मि
च्छं नीनस्येवे मुनेः॥ शापं प्रतीक्षती तस्य तूष्णीं तस्थौ शुचिस्मिता॥ पतिव्रतां ततः प्राह स पत्नी स मुनिः प्रिये॥ पराशर उवाच॥ किं पश्यसि वरारोहे २५
निर्लज्जां पुरतः स्थितां॥ तपोनाशकरीं धृष्टां शापं चापि समीक्षतीं॥ सर्वमेव मया ज्ञातं वदर्थेयं समागता॥ इंद्रेण प्रहिता नूनं वसंतमदनादिभिः॥ सहिता २४
तपसो नाशमेक कर्तुं च समध्यमे॥ येन केन प्रकारेण तपोनाशस्त्वियं॥ इंद्रसंदेशं कुर्वाणा भोगाद्दा शापतोपि वा॥ कामाद्यो पि सर्वे वै निलीनाः संति

पर्वते॥ इयमेकैव नाशार्थे तपसः संस्थिता पुरः॥ इमां शप्तुं समर्थोपि न शपेहं सुमध्यमे॥ यथा भोगात्तपोनाशस्तथा शापादपि प्रिये॥ तस्माच्छापा
दिना त्वत्र दंडनीया गणैर्युता॥ दुर्विनीता यथा पश्चादन्यत्रेदं न कारयेत्॥ अगस्त्य उ०॥ इत्थं पतिवचः श्रुत्वा शापं दातुं समुद्यत॥ तदा कामादयः सर्वे
चकंपुः शापकातराः॥ हा हता मन्ये वयं यामो मोहो दैवयोगमातः॥ पतिव्रता महाशापाद्भविष्यामो वयं किल॥ भस्मीभूतास्ततः सर्वे पलायध्वं यथे
छया॥ अगस्त्य उ०॥ पलायतः परान्दृष्ट्वा स मुनिः कृपयार्दितः॥ हसन्प्रोवाच सलिलं कामवायुपुरोगमान्॥ पराशर उवाच॥ माभैर्मा भैर्मधोका
मरेवाद्यो भो मधो चिरं॥ मत्कृतं पूजनं सर्वे यगृण्हंतु यथाविधि॥ आश्रमं मामकं शून्यं मा कुरुध्वं समाश्रितं॥ अतिथिर्यस्य भग्नाशो गृहात्प्रतिनि
वर्तते॥ तस्य पुण्यं समादाय पापं दत्वा स्वकं हि सः॥ अतिथिं स्वागतं यो न स्वागतेनाभिनंदयेत्॥ तस्य पुण्यं निरर्थं स्याद्यथा शूद्रकृतो मुखः॥ विप्रपा
दोदकाम्नि वजातो यत्र सुकर्दमः॥ मन्येत माश्रमं नूनं स्मशानं सदृशं परं॥ ब्रह्मघोषो नैव यत्र जायते जातु मंगलः॥ मन्येत माश्रमं शून्यं स हि गर्ह्यम
मंगलं॥ स्वाहा स्वधादिकं नैव कर्म यत्र प्रवर्तते॥ तमाश्रमं त्यजेत्पापं श्वपचाश्रमवत्सदा॥ यत्र मूलफलैर्वापि भवेदतिथिपूजनं॥ तमाश्रमं विजानी
यात्सर्वदैव परिश्रमं॥ तस्मात्कृतं मयि प्रीत्या बलिं गृह्णय यथाविधि॥ ततो गच्छंतु वै सर्वे स्वाश्रमं स्वगणैः सह॥ अगस्त्य उवाच॥ इत्याश्चर्यकरं वाक्यं श्रु
त्वा कामपुरोगमाः॥ नमस्तुभ्यं मुने सुश्रु सपत्नी सपत्नीकत्र पान्विताः॥ मुनिना पूजिताः सर्वे ह्युपचारैः स्तपोद्भवैः॥ स साधु सा तपः सुश्रु मुनिं चकुस

क०र०मा० मुद्यता। कामादयऊचुः॥ चित्रं विचित्रं मुनिवर्य तावकं हषश्च नांतःकरणस्य संमतः॥ यन्मज्जयोर्दृष्टचरः क्व नित्यशो चित्रं महद्यन्ननु कोपनिर्जयः॥
२५ तपो निविष्टं ननु सर्वसंभृतं यन्मज्जयार्थं धृतमेकाकोपयोः॥ कामक्रोधौ दुर्जयौ वरिष्ठुश्रेयो तपस्विनस्तपसो दानदक्षौ॥ तयोः पूर्वं भोगजस्त्वासत्यः सो
दुःशक्यो न द्वितीयः कदाचित्॥ सत्यामहात्म्यात्किल निर्जितानि सती यतस्त्वेव महत्त्वभाग्यं॥ त्वं करोषीति वेश्रुत्वा स्वलोकविजिगीषया॥ तपश्चंद्रेण
प्रहितास्त्वन्नाशार्थमिहागताः॥ क्षेत्रमाहात्म्यतो वापि सती माहात्म्यतोपि च॥ जेतुं त्वां न समर्थाहि जातास्तस्मान्महत्तपः॥ इंद्रलोकस्पृहां जातु त्वयिना
लोचयामेह॥ पतिव्रतायुतस्याथ कोलोकस्तु दुरासदः॥ पतिव्रता यस्य गेहे तस्य किं तपसा फलं॥ कल्पवृक्षाश्रितस्येह न दारिद्र्यं यथा भवेत्॥ सतीसत्य
वतीचेयं कल्याणी च सुधर्मिणी॥ नवांगच्छायया तुल्या यत्कथा पुण्यकारिणी॥ पतिव्रता स्वरुंधन्या सावित्र्यानुसूयया॥ शांडिल्यया च सत्या च लक्ष्म्या
चशतरूपया॥ मेनया च सुनीत्या च संज्ञया स्वाहया तथा॥ यथैषा कथ्यते श्रेष्ठा तथान्येति सुनिश्चितं॥ भुंक्ते भुंक्ते त यि मुने तिष्ठति त यि तिष्ठति॥ वि
निद्रिते च निद्राति प्रथमं परिबुध्यते॥ न चैतेनाम गृह्णीयान्नवायुष्य विरुद्धये॥ पुरुषांतर नामापि न गृह्णाति कदाचन॥ अनालंकृतमात्मानं न च नो दर्श
येत्क्वचित्॥ कार्यार्थं प्रेषिते नाथापि सर्वमंडनवर्जिता॥ आक्रुष्टापि न चाक्रोशेत्ताडितापि प्रसीदति॥ इत्थं कुरु कृतं स्वामिन्मन्यता मितिवक्ति चा॥ आदापिर्नल २५
याकिंचिन्मम ददास्यपि॥ न चिरं तिष्ठते द्वारि न द्वारमुपसेवते॥ आहूता गृहकर्माणि त्यक्त्वा गच्छति सत्वरं॥ नाथाहूता किमर्थं तु प्रसादो मे विधीयतां॥ पूजोपक

रणं सर्वमनुक्तस्यानयेत्स्वयं॥ नियमोदकबर्हंषि पत्रपुष्पाक्षतादिकं॥ प्रतीक्षमाणावसरं यथाकालोचितं च यत्॥ तदुपस्थापयेत्सर्वमनुद्वि
ग्ना तिहृष्टवत्॥ सेवते भर्तुरुच्छिष्टमिष्टमन्नफलादिकं॥ महाप्रसाद इत्युक्त्वा पतिदत्तं प्रतीक्षती॥ अविभज्य न चाश्नीयाद्देवपित्रतिथिष्वपि॥
परिचारकवर्गेषु गोषु भिक्षुकुलेषु च॥ त्वया कार्यमनुज्ञाता नोपवासव्रतादिकं॥ दूरतो वर्जयेदेषा समयोत्सवदर्शनं॥ गच्छेन्न तीर्थतत्रादिवि
वाहप्रेक्षणादिषु॥ स्त्रीधर्मिणी त्रिधात्रं तु स्वमुखं नैव दर्शयेत्॥ स्ववाक्यं श्रावयेन्नापि यावत्स्नानेन शुध्यति॥ सुस्नाता भर्तुर्वदनं मीक्षते न्यस्य
न च क्वचित्॥ अथवा मनसि ध्यायन्पतिं भानुं विलोकयेत्॥ सुखं चैव सुखासीनं रममाणं यदृच्छया॥ आतुरेष्वपि कार्येषु पतिं नोत्थापयेत्क्वचित्॥ हरि
द्रां कुंकुमं चैव सिंदूरं कज्जलं तथा॥ कर्पूरं चैव तांबूलं मंगुल्याभरणादिकं॥ केशसंस्कारकबरीकरकर्णविभूषणं॥ भर्तुरायुष्यमिच्छंती दूरयेन्न पति
व्रता॥ नोलूखले न मुसले वर्धन्यां चदृषद्यपि॥ न यंत्रके न देहल्यां सती चोपविशेत्क्वचित्॥ विना व्यवायसमयं प्रागल्भ्यं न चरेत्क्वचित्॥ यत्रयत्ररुचिर्भ
र्तुस्तत्रहो मवती सदा॥ हृष्टे हृष्टा विषण्णा स्याद्विषण्णास्ये प्रियेसदा॥ एकरूपा भवेत्पुण्या संपत्सु च विपत्सु च॥ तीर्थस्नानार्थिनी नारी पतिपादोद
कं पिबेत्॥ शंकरादपि विष्णोर्वा पतिरेकोधिकः स्त्रियः॥ व्रतोपवासनियमं पतिमुल्लंघ्य याचरेत्॥ आयुष्यं हरते भर्तुः सा नारी नरकं व्रजेत्॥ उक्ता प्रत्यु
त्तरं दद्यान्नारी सक्रोधतत्परा॥ नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोषणं॥ इदमेव व्रतं स्त्रीणां मयमेव वृषःपरः॥ इयमेका देवपूजा भर्तुर्वाक्यं

कू०मा० नलंघयेत्॥सरमाजायंतेग्रामेसृगालीजायंतेवने॥स्त्रीणांहिनियमश्चैकःपरमःसउदाहृतः॥अभ्यर्च्यचरणौभर्तुर्भोक्तव्यंहितनःपरं॥याभर्त्ता
२६ रंपरित्यज्यरहश्चरतिदुर्भगा॥उलूकीजायंतेक्रूरावृक्षकोटरशायिनी॥ताडिताताडितुंयेछेत्साव्याघ्रीवृषदंशका॥कटाक्षयतियान्यंवैकेकराक्षी
तुसाभवेत्॥पतिंयायांतमालोक्यत्वरितावजलासनैः॥तांबूलैर्व्यजनैश्चैवपादसंवाहनादिभिः॥यथैववाटुवचनैःखेदसंन्मोदनैःपरैः॥याप्रियंप्री
णयेत्प्रीतात्रिलोकीप्राणितातया॥मितंददातिहिपितामितंभ्रातामितंसुतः॥अमितस्यहिदातारंभर्तारंकानपूजयेत्॥भर्तादेवोगुरुर्भर्तातीध
र्मतीर्थव्रतानिच॥तस्मात्सर्वप्रयत्नेनपतिमेवसुपूजयेत्॥यापतिंहरिभावेनभजेत्स्त्रीरिवनत्सरा॥हर्यात्मनाहरेर्लोकेपत्याश्रीरिवमोदते॥जीव
हीनोयथादेहःक्षणादशुचितांव्रजेत्॥भर्तृहीनातथायोषासुस्नाताप्यशुचिःसदा॥अमंगलेभ्यःसर्वेभ्योविधवात्यत्यमंगला॥विधवादर्शना
त्सिद्धिर्जातुक्वापिनजायते॥विहायमातरंचैकांसर्वाःकल्याणवर्जिताः॥तदाशिषमपिप्राज्ञस्त्यजेदाशीविषोपमं॥कन्याविवाहसमयेवाचयेयु
रितिद्विजाः॥भर्तुःसहचरीभूयाज्जीवतोजीवनःसदा॥भर्तासदानुयातव्योदेहावस्थायथात्मियः॥चंद्रमाज्योत्स्नयायद्वद्विद्युत्वाद्विद्युतोयथा॥
अनुव्रजतिभर्तारंगृहात्पितृवनंयथा॥पदेपदेश्वमेधस्यफलंप्राप्नोत्यसंशयं॥व्यालग्राहीयथाव्यालंबिलादुद्धरतेबलात्॥एवमाक्षिप्यदूतेभ्यः २६
पतिंस्वर्गंनयेत्सती॥यमदूताःपलायंतेआलोक्यदूरतःसती॥अपिदुष्कृतकर्माणंसमुत्सृज्यचनसतिं॥यावत्स्वर्लोकसंख्यास्तितावल्कोट्ययुता

निच॥भर्त्तास्वर्गसुखंभुंक्तेरममाणापतिव्रता॥धन्यासाजननीलोकेधन्योसौजनकःपुनः॥धन्योसचपतिःश्रीमान्यस्यगेहेपतिव्रता॥पितृवंश्या
मातृवंश्यास्त्रियश्चैवपुनंतिहि॥पतिव्रतायाःपुण्येनस्वर्गेसौख्यानिभुंजते॥आपःपतिव्रतास्पर्शमभिलाषंतिसंयशः॥अघनुर्दृष्टेतोविनाशो
नोयातास्त्वद्यातिपावनाः॥भार्याधर्मफलावाप्त्यैभार्यासंतानवृद्धये॥परलोकस्त्वयंलोकोजायतेभार्ययाद्वयं॥पर्यंकशायिनीनारीविधवापात
स्मा येत्पतिं॥तद्भूशयनंकार्यंपतिसौख्यसमीहया॥नैवांगोद्वर्तनंकार्यंस्त्रियाविधवयाक्वचित्॥गंधद्रव्यस्यसंभोगोनैवकार्यश्चभूषणं॥नकेशास्था
पनंचैवनमौक्तिकंनकंचुकं॥तांबूलग्रहणंनैवजग्धान्नंचनिरयंव्रजेत्॥भोक्तव्यमेकवारंचताम्रपात्रादिषुद्विज॥कांस्यपात्रेवभुंजन्वैप्रानुया
त्किल्बिषंमहत्॥तर्पणंप्रत्यहंकार्यंभर्तुस्तिलकुशोदकैः॥विष्णोस्तुपूजनंकार्यंपतिबुध्यानचान्यथा॥पतिमेवसदाध्यायेद्विश्वरूपधरंहरिं॥
यद्यदिष्टतमंलोकेयच्चपत्युःसमीहितं॥तत्तद्गुणवतेदेयंपतिप्रीणनकाम्यया॥वैशाखेकार्त्तिकेमाघेत्याषाढेनियमांश्चरेत्॥सत्कथाश्रवणंका
र्यंमंतदृष्टवतीसदा॥नहसेन्नवदेन्नोच्चैर्नकंचनसमस्पृशेत्॥विष्णुरूपेणपतिनानधार्ष्ट्येनसंस्पृशेत्॥एवंविधैश्चविधवाविविधैर्नियमैर्व्रतैः॥
नाधिरोहेदनड्वाहंप्राणैःकंठगतैरपि॥मुक्ताफलकृतंहारंसुवर्णमणिमंडितं॥नधारयेत्तथावस्त्रंचित्रितंसप्तरंगकैः॥शुक्लांबरधराशुद्धात्रि
कालस्नानकीतथा॥पितृपतिसुतभ्रातृवचनंकारयेच्चवै॥तद्वचोलंघनंकृत्वारौरवंनिरयंव्रजेत्॥व्रतचर्यापरानित्यंविधवापिपतिव्रता॥एवंधर्म

समायुक्ताशरीरंक्षीयतेव्रतैः॥पतिलोकमवाप्नोतिनभवेत्क्वापिदुःखभाक्॥गंगासमाचविज्ञेयायानारीपतिदेवता॥उमाशिवसमासाक्षात्तस्मा
त्तांपूजयेद्बुधः॥गंगास्नानफलंत्वेतद्यज्ज्ञातंतवदर्शनं॥सत्यवतीमहाभद्रेभर्तृपादांबुजेक्षणे॥इदंपतिव्रतंतेजोब्रह्मतेजोभवान्परं॥तत्रोप्ये
तत्तपस्तेजःकिमसाध्यतमंतव॥भुक्तिमुक्तिर्नृणांयत्रजायतेकरवीरके॥तत्रसंवसतस्तेवैमज्जयःकिंनुदुर्लभः॥उत्तरेचयथाकाशीसर्वकल्मषना
शनी॥तद्वद्दक्षिणजाकाशीकामक्रोधविनाशनी॥त्वदीयंजीवितंधन्यंवासोयत्करवीरके॥यत्राधिकेमहाक्षेत्रेचक्राकारेमहामुने॥पश्यतोपिप
दंश्रेष्ठंनीचाअपिसुधातिहि॥इतिमत्वाद्विषंत्यत्रवासिनोद्रुहिणादयः॥कुर्वंतोप्यंतरायान्वैनसमर्थाभवंतिहि॥देव्यासुरक्षिताःसंतिकरवीरसु
वासिनः॥यमोपिप्रभुर्यत्रकिंनत्रमादृशाःखलाः॥तपोनाशयितुंशक्ताभविष्यंतितवानघ॥क्षम्यतांममदौरात्म्यमज्ञानाद्यदनुष्ठितं॥धर्मोयंम
हतांश्रेष्ठःशरणागतरक्षणं॥गंतुमाज्ञांमुनेस्माकंदेहिवैपरसेविनां॥गत्वाकिंकथनीयंनेमहेंद्रंतत्सदिश्यतां॥१२५॥इतिश्रीपद्मपुराणेकरवीरम
हात्म्येआगस्तिलोपामुद्रासंवादेसत[illegible]नीमाहात्म्यदशमोध्यायः॥ ॥अगस्त्यउवाच॥इतितेषांवचःश्रुत्वामुनिःपाराशरप्रिये॥प्रशस्यश्लक्ष्ण
याचावाप्रवक्तुमुपचक्रमे॥पराशरउवाच॥सर्वेगंतुकामाद्यास्वालयंतुष्टमानसाः॥भवत्स्वभावएवायंयदन्यद्दूषणाशनं॥आरब्धंनमयेयेनतद्धि 
तपोलोकजिगीषया॥सुखेनस्थीयतामिंद्रःस्वलोकेभोगलालसः॥मयांसंतप्यतेनैवेनतपोलोकहितायवै॥अवतारंकलौकृत्वाहरिर्ब्रह्मसमुद्भवः

वेदंसंविभजेत्सर्वमित्येतन्ममनिश्चितं॥करवीरवासिनांनित्यंनासाध्यंस्वार्गिकंसुखं॥असाध्यमपिसंसाध्यंतपसात्रमनीषिभिः॥भवद्भिःकोर
शस्त्रोनैःदशाश्वमेधिकेनृभिः॥संप्राप्यंतेसुखेनैवतदर्थंहितपोमृषा॥शतानाश्वमेधैर्नेनुलभ्यंतेयद्वस्सदंकालहतंहिसर्वैः॥कोल्हापुरस्थैःकि
मदुर्लभंतद्दिक्षैवदत्तात्रनकिंलभेत॥नीराजनंयेत्रमहर्निशंयेपश्यंतिदेव्याःकरवीरकेपुरे॥तेनैवत्तसाःनभजंतितन्यंब्रह्मादिलोकंजि
तविष्णुलोकाः॥दशाश्वमेधेननुमज्जनंनृणांददातिकिंस्वर्गफलंहितुल्यं॥नत्विंमहत्स्वार्थ्यतमंजनानांकोल्हापुरेमुक्तिपुरेस्थितानां॥अहोवि
मुक्तेश्वरवीरकेपुरेकिंतिष्ठतांकिंभयमिंद्रमत्र॥क्रोधादिबीजंननुहंतिसर्वंनीरीक्षणंयत्रऊगञ्जनन्याः॥नवेदकिंसर्वमिदंमहेंद्रःस्नात्वाग
तायस्यमहेंद्रकुंडे॥द्विजातिहत्यामहतीविचित्रंसविस्मृतंकिंकरवीरकंपुरं॥इच्छंतितेकिंनविदुःपुराणंदुर्वाससात्रापमथ्रोषनाशनं॥अगस्त्य
उवाच॥इतिस्मृत्वावचस्तस्यकामाद्याःसर्वशर्मदं॥परिक्रम्यमुनिंचैवसपत्नीकंदिवंययुः॥परस्परंवदंतोवैःक्षेत्रमहात्म्यमुत्तमं॥तपःसिद्धिं
मुनेश्चापिवर्णयंतोतिविस्मिताः॥कामउवाच॥अहोतिचित्रंजगतीतलेमयाविचिन्त्यतेतद्दृङ्नविदृष्टंसुतीर्थं॥जितंमयैकेनजगत्त्रयंपुरापरा
भवेत्दृष्टचरोनकुत्रचित्॥जितान्यत्रभवप्रमुख्याःमद्भयतःकोपसुजन्मतोपिवा॥एकेनबाणेनमहद्विचित्रंबाणत्रयंमेत्रवृथागतंमहत्॥
देवेषुजातामहतीविलज्जातेषांमतोहंव्यहुवैस्वरूपे॥कथंमयागम्यमपीद्रसन्निधौहास्यास्पदंमेजनंवृथागतं॥माबोधिपूर्वंकरवीरकंपुरं॥

नयत्रकश्चित्लभवेद्दिकर्तुं॥श्रुतंभवेच्चेदितिमद्विधानांकथंभवेदागमनंहिपूर्वं॥अगस्त्य०॥इतिब्रुवन्स्ततःसर्वेमहेंद्रमभिगम्यच॥प्रोचुःस
र्वंसमाख्यानंयथावृत्तंपुरातथा॥श्रुत्वाक्षेत्रस्यमाहात्म्यंमुनेःपत्नीपुत्रस्यच॥प्राहप्रसन्नवदनोदेवानांश्रृण्वतांहरिः॥इंद्रउवा०॥अहोतिध
न्याकरवीरवासिनोत्येषांतपोनाशाकरोतिकोपः॥अस्मद्विधानामकोपजन्मनोहंत्याप्रभूताअपिभूसुराणां॥नचित्रमेतत्करवीरकेपुरे
संसारपारेरिवलत्तीर्थसारे॥उन्मूलनंकौसुकोपयोर्यत्तत्रवस्थितानांविधिवत्कृतांहसां॥तीर्थामयायत्रमहातिपापंसंस्थानदानादिभि
रप्यपूर्वैः॥यदन्यतीर्थैर्बहुभिर्ननाशितंतंनचित्रमेतत्करवीरकेपुरे॥अस्मत्कृतान्विघ्नवरानूसंदेवतरंतिसर्वेकरवीरवासिनः॥तन्मूर्ध्निमा
धायपदानितेवैगच्छंतिविष्णोःपदमंजसेव॥वयंस्थितायद्यपिवृक्षरूपाकोल्हापुरेऽथापिनराःसंदेवाः॥येस्नानदानादिरताःसंदेव्याः
प्रेक्षंतिसारार्तिकमाननंशुभं॥वयंविमूढाननुमत्सरेयावृक्षस्वरूपाःकरवीरवासिनां॥अयिस्थितास्नानसुदानशोभिनांलेभजा
मोनकृतस्यंतेषां॥धन्यःपराशरोयैवेतपोयेनसुरक्षितं॥शापदानसमर्थोपिनशशापतपोव्ययात्॥मूर्खाणांतपसोनाशोद्वाभ्या
मेवहिजायते॥कामाद्वाकोपतोवापिनबुद्धानांकदापिसः॥कामवश्यस्यजायंतेभोगाःसर्वेतपोव्ययात्॥क्रोधवश्यस्यसर्वेहिनश्यं २९
तेव्यर्थमेवहि॥तस्मात्क्षेत्रंवरंदिव्यंकरवीरमहत्तरं॥पराभवोनेवैयत्रवासिनांकामकोपयोः॥अगस्त्यउवाच॥इत्युक्त्वाक्षेत्रमाहात्म्यंम

हेंद्रश्छिन्नसंशयः॥लोकस्वंप्राप्तमालक्ष्यस्वकंतस्थौमहामुने॥अगस्त्य०॥एवंगतेथकामेवैमुनिःपाराशरःप्रिये॥पुनस्तप्तुंसमारेभे
स्वतपःपूर्ववत्स्थिरः॥शीर्णपर्णानिराहारःक्वचिन्मूलफलाशनः॥कृत्वापाराशरंतीर्थंसत्यवत्याख्यमेवच॥पराशरंपरंलिंगंसंस्थाप्यवि
धिपूर्वकं॥सत्यवतीश्वरीदेवींसंस्थाप्यचयथाविधि॥निरेनामापिसंचक्रेपराशराश्रमेत्यनु॥वरंददौचतत्क्षेत्रस्वनाम्नाभूषितेशुभे॥प
राशराभिधेकुंडेयेस्नास्यंविधिपूर्वकं॥पराशरेश्वरंलिंगंपश्यंतिशान्तिसंयुतं॥तेकामकोपनिर्मुक्तायास्यंतिपरमांगतिं॥पुत्रपौत्रादिसफ
लंसकामस्यातुसर्वदा॥येचात्रवासिनःसर्वेतेयांतिपरमांगतिं॥कामादिदेववृंदेभ्योभयंमास्तुविशेषतः॥परेषांदुर्गमंभूयात्स्थानमेतन्म
माज्ञया॥परमेवंविधंज्ञात्वातपःप्रारब्धमुद्भवं॥संन्नियम्येंद्रियग्रामंमनसाचिंतयंन्हरिं॥प्राणनियम्यैवेमूर्ध्निदधारसयदामुनिः॥तदा
तत्तपसासर्वेपातालस्थाश्चपन्नगाः॥संतप्तामीलिताःसर्वेविचार्यचपुनःपुनः॥अहोकिमेतदारब्धमकालेलयकारणं॥विचारयंतस्तेसर्वे
बुबुधुस्तेमुनेस्तपः॥कुर्वंतस्तेतपोनाशंसुपायंतत्रचिंतयन्॥तपस्तपतियेनेहजलेनगिरिमस्तके॥मुनिःपराशरस्तेद्देज्वलंतंसर्वंवि
ष्कृतं॥नासीत्पूर्वंजलंतत्रश्रत्सण्याहितपोबलात्॥कृतंहिवर्ततेतत्रमुनिःस्नानादिकंचरेत्॥कुंडत्रयाद्दतेतत्रजलमन्यन्नविद्यते॥त
ज्जलंपरिशोष्यंहिसर्वैरस्माभिरादरेतेः॥शोषितेवैजलेतत्रमुनिःकुर्यात्कथंतपः॥एवंसंचिंत्यतेसर्वेपन्नगाःसर्वएवहि॥कुंडत्रयगतंसर्वे

का॰ मा॰ जलं संप्रोष्य यत्नतः॥ निरुध्य निर्झरद्वारं संस्थितास्ते पृथक्पृथक्॥ ततः स्नानं गतः कर्त्तुं तदा पाराशरो मुनिः॥ न ददर्श जलं तत्र कुंडेष्व
२९ प्यगतं शुचिः॥ तदा चकार महतीं चिंतां तत्र सुसंस्थितः॥ किमद्य करणीयं वै केन नीतं जलं त्वितः॥ नीतमिंद्रादिभिः किं वा मदनाद्यैः सुको
पितः॥ इत्थं चिंतयतस्तस्य मनः संयच्छतो मुनेः॥ विज्ञानमभवत्सर्वं ततश्चेदमुवाच ह॥ मूढा हि पन्नगाः सर्वे किं न जानंति मत्तपः॥ येमज्जलं
प्रणीयाथ साधुवत्संस्थिताः सुखं॥ ब्राह्मणानां हि महात्म्यं किं नूनं विस्मृताः परं॥ यत्र कुंडेषु ये सर्वे स्थीयाः संपातिताः पुरा॥ दंडनीया
मया त्वेते सर्वदुःखपदा हि पात्॥ अगस्त्य उवाच॥ ततो गारुडिकैर्मंत्रैर्दर्भान्संमंत्र्य वै मुनिः॥ विससर्ज च पाताले पन्नगाः संति यत्र वै॥ तैः
कुवीर्गरुडाकारैः पन्नगाश्च प्रपीडिताः॥ हताः केचिन्मृताः केचित्केचित्संछिन्नमस्तकाः॥ अन्यत्राल्पधरारणाः शरणं तं मुनिं ययुः॥ पन्न
गा ऊचुः॥ नमामहे द्विजवर्यं मुनींद्रं पराशरं तपसो राशिभूतं॥ सत्यायुक्तं तापसं सर्वदिक्षु तपोनिष्ठं जगतो वै हिताय॥ ये वै द्विजा विष्णु
मुखप्रसूताः सुखं हि दिव्यं परमं सुराणां॥ ते किं न कुर्वंति स्वलं पवित्रं दृष्टिप्रपातेन कृतार्द्रचित्ताः॥ यत्त्वेवया बहवः संप्रतीर्णाः भवांबुरा
शिं सपराः पुनंति॥ पुनंति ते किं न हि जडं हि लोकं स्वपादपांसुप्रसवैः पवित्रैः॥ यत्पादपांसुप्रसवं सुसेव्य लक्ष्मीः स्थिरा तिष्ठति विष्णुगेहे॥ ते ब्रा २९
ह्मणास्तारयितुं न चालं कं सर्वलोकाश्रितपादपद्मं॥ येराहतो विष्णुरपि स्वयं पदं दधार तेषामुरसि प्रसिद्धं॥ रक्षंति ते लोकमिमं विमूढ मस्मद्विधं पा

पकरद्विजेषु॥ कामक्रोधौ संजितौ वित्य पूर्वं श्रुतं सर्वैः पूर्वमासीत्त्वयेति॥ कोपः कोयं संस्थितस्त्वच्छरीरे सर्पान्हंतुं यस्तपोघ्नः परो रिः॥ तद्
क्षरक्ष शरण्यागतपालनं हि युक्तं महत्सु पुरुषेषु भवद्विधेषु॥ अज्ञानतो हि निधृतं जलमस्मदीयैस्तत्क्षमस्व प्रणतिं करवाम ते च॥ अगस्त्य॰
॥ इति संप्रार्थितो नागैः कोपं संत्यज्य वै मुनिः॥ प्रियेप्रसन्नवदनः पन्नगानिदमब्रवीत्॥ पराशर उ॰॥ भो भो नागवराः सर्वे श्रुणुध्वं वचनं म
म॥ भवदीयैर्जलैर्यैर्वै शोषितं तीर्थजं परं॥ यद्ब्राह्मणा समानीतं तपसा सर्वतीर्थतः॥ ते सर्वे जलपानेन प्राप्ताश्चातिपवित्रतां॥ पूजा दर्शनतस्ते
वै पुनंतु जगतीतले॥ अस्मिन्नेव गिरौ सर्वे संतिष्ठंतु समागताः॥ तेषां नाम्नैव विख्यातमिदं क्षेत्रं भविष्यति॥ पूजां चैव करिष्यंति सर्वलोकाः
सदैव हि॥ तत स्थिताश्चैते नागा ये सर्वे जलपायिनः॥ प्रहृष्टवदनांभोजाः क्षेत्रसेवनतत्पराः॥ येनैर्पीतं जलं पुण्यं ते सर्वे पन्नगाः पुनः॥ ज
ग्मुः प्रखिन्नमनसः पातालं स्वाश्रमं तथा॥ किं वर्ण्यते तीर्थमाहात्म्यं दुष्टबुध्यापि सेवतां॥ तिरश्चामपि वै सुभ्रु जायते चेदृशी गतिः॥ न चित्रं न मम
तद्धि विजानीहि पतिव्रते॥ वस्तुशक्तिं मृषा कर्त्तुं न शक्या ब्राह्मणापि हि॥ दुष्टबुध्यापि यत्पीतं ममृतं सर्वकामदं॥ ततः सर्वेपि ते नागाः प्रहृष्टम
नसस्तदा॥ पातालप्रभवां गंगां मानयामास्करोजसा॥ सर्वेषां तारणार्थाय मुनेश्चापि वितुष्टये॥ तथा पर्वतमापूर्य संस्थिताः सर्व एव हि॥ त
दाप्रभृति वै सुभ्रु निर्झरो वहते सदा॥ पातालसद्गुद्भूतस्तस्मिन्गिरिवरे शुभे॥ एवं पर्वतमापूर्य पातालगंगयाप्रिये॥ निर्झरं चापि तस्यां वै स

र्वपापप्रणाशनं॥दृष्ट्वाश्रीनमनाःप्राहसर्पोन्पाराशरोमुनिः॥पराशरउ॰॥भोपन्नगवराःसर्वेशृणुध्वंवचनंमम॥भवद्भिःपावितंयस्मात्क्षेत्रं
वैमहदुत्तमं॥प्रथितंहिभवेत्तस्माद्भवन्नाम्नैवसर्वदा॥पन्नगालयमित्येवंसर्वपापप्रणाशनं॥समानीतोत्रयेश्चापिनिर्झरःसर्वपुण्यदः॥नागनिर्झ
रनाम्नैवप्रथितःसर्वदाभवेत्॥इदंनागेश्वरंलिंगंभवन्नाम्नैवविश्रुतं॥प्रथितंसर्वलोकेषुभवेदाचंद्रतारकं॥भवंतःसर्वदेवात्रसंस्थिताःसुसमा
हिताः॥स्नानदानरतानांचलिंगसंपूजिनांतथा॥कुलवृद्धिंपुत्रपौत्रैःप्रकुर्वंतुप्रपूजिताः॥संवर्धतेयथायुष्मत्कुलवल्यनपायिनी॥तथाभ
वेपूजकानांकुलवल्यनपायिनी॥अगस्त्यउ॰॥वरमेवंगृहीत्वाथसर्वेतेपन्नगाःशुभे॥तथेत्युक्त्वास्थिताःसर्वेसर्वकामप्रदानृणां॥यनर
घातिनश्चैवयेचापिब्रह्मघातिनः॥नागनिर्झरसुस्नाताःकृतदानसुतर्पणाः॥नागेश्वरंचसंपूज्यमुच्यंतेतेहसंसारिवलात्॥कुंछकंड्वादिकं
चापिविलयंयांतिसर्वदा॥स्नानदानरतानांचनागेंद्रांश्रद्धयार्चतां॥९०॥इतिश्रीपद्मपुराणे॰करवीरमाहा॰एकादशोध्यायः॥ ॥
द्यतः॥ अत्रकिंस्थापितंचेदंशावंसर्वैर्महात्मभिः॥ किंनूनंवाजिमेधानांकरवीरनिवासिनां॥ दशाश्वमेधकेतीर्थमज्जनासक्तचेतसं॥ कतिभा
व्याजिमेधाराजन्नत्कथयाशुभे॥ दश्मेत्युक्तेगतस्तत्रदशाश्वमेधकेद्विजः॥ तथैवोद्घार्यसंकल्पंस्नात्वाचैवविधानतः॥ संतर्प्यचपितृन्देवान्श्र
द्धाभक्तिसुसंयतः॥ दशाश्वमेधमाहात्म्यंसंस्मरन्त्हदिसंस्थितः॥ ब्राह्मणंचतथापूज्यगंधपुष्पादिनातथा॥ नत्वासंप्रार्थ्यविधिवदागतः
शावसन्निधौ॥ जनेषुस्मितयुक्तेषुप्रवदत्सुचनिष्ठुरं॥ कथमेकःशावंभिक्षुरुद्धार्याथस्वयंदहेत्॥ प्रबलैरपियत्नैर्वैरस्माभिर्नैवचालितं॥ तत्कथं
हिस्वयंकर्तुमुद्यतोस्तिविमूढधीः॥ हास्यंचापिनचैवेतिजनानांधृष्टमानसः॥ इतिलोकेषुजल्पत्सुधर्मशर्माद्विजोत्तमः॥ शावंसंपूजयामा
सनत्वाचैवयथाविधि॥ साक्षाद्विष्णुगणोपितंदर्शनात्सर्वपापहं॥ तच्छवंदिव्यमालोक्यप्रहृष्टवदनःप्रिये॥ लोकंचैवंजडंदृष्ट्वाकिंचित्सोवा
चविस्मितः॥ अहोजनाबालिशाएवसर्वेमन्यंतियेपूर्वेकरवीरकेपुरे॥ शवंत्वावंतेपश्युहिमूढाःविष्णुस्वरूपंनपरंपराविदुः॥ तथापिधन्याःकर

कर० मा० वीरवासिनो मृताभविष्यंति शिवस्वरूपाः ॥ श्रीविष्णुदूतैरभिमृज्यमानास्तदानुवेत्यत्यविमुक्तवासं ॥ यज्जीवतोप्यत्र मृताः स धन्याः
४५ ६ विष्णुरूपास्तपाः करवीरवासिनः ॥ तेषां नु पुण्यं न नु गण्यते किं रुद्रेंद्रचंद्रादिभिरप्यपूर्वं ॥ न द्रष्ट्यते किं सुकृतं मनुष्ये गोभूतिलाज्यादिहिरण्य
दानिनां ॥ भिक्षाप्रदानादि कृतं न तुच्छं तस्मात्सुपुण्याः करवीरवासिनः ॥ अगस्त्य उ० ॥ इत्थमुक्त्वा द्विजः सोथ हरीं संस्मृत्य लीलया ॥
चिताउज्वाल्याथ भावं निधायाथ प्रदग्धवान् ॥ तस्मिन्नेव विवेशाग्नौ ब्राह्मणी सा सुविस्मिता ॥ तीर्थाविश्वास जातापापात्मा यश्चि
न मथा भवत् ॥ तदग्निस्पर्शमात्रेण दिव्यरूपधरावुभौ ॥ अग्निमध्येतु विध्मातहेमवर्णौ विरेजतुः ॥ घंटाघोषसुनिर्भातदिव्ययान
समास्थितौ ॥ सुधर्मणा समायुक्तौ जग्मतुर्विष्णुमंदिरं ॥ दृष्ट्वा तन्महदाश्चर्यं गंडो राजा जनैः सह ॥ स्नात्वा तत्र विधानेन जयघोषपुरः
सरं ॥ गृहं स्त तत्तीर्थमाहात्म्यं लक्ष्मीं पूज्य यथाविधि ॥ अथैन्नपात्रं तथा दाय स्वर्यं लोकसमागतं ॥ गृहागतश्चैव सुभृत्यसकीयं लोकसं
युतः ॥ इति श्री पद्मपुराणे करवीरकांडे करवीरमाहात्म्ये अगस्तिलोपामुद्रासंवादे दशाश्वमेधवर्णनं नाम सप्तदशोध्यायः ॥ १७ ॥ ॥ रामू
अगस्त्य उवाच ॥ दशाश्वमेधमाहात्म्यं प्रक्षस्त्येवीक्ष्य पार्वती ॥ विश्वनाथं प्रणम्याथ विज्ञप्तुं किंचिदुद्यता ॥ श्री पार्वत्युवाच ॥ विश्वनाथ ४५
विरूपाक्ष सर्वलोकाघनाशन ॥ दृष्टानि बहुतीर्थानि न दृष्टमीदृशं क्वचित् ॥ सर्वदेवगणोपेतं सर्वतीर्थनिषेवितं ॥ भुक्तिमुक्तिप्रदं तूर्णं कर

वीरं पुरं महत् ॥ काशीक्षेत्रगुणाः सर्वे संत्यत्र करवीरके ॥ उन मंत्रेक्रमे योगना स्ति यत्तारकश्रुतिः ॥ सर्वेषां तारकस्त्वं हि जनानां सर्वतः पिता
॥ कृपया देवदेवेश त्वं शरणागतपालक ॥ स्थितास्त्वस्मिन्महाक्षेत्रे कृपया ज्ञाप्याहि सर्वदा ॥ तारकस्योपदेशेन पुनीहि सकलान्मृतान् ॥ अगस्त्य उ०
तस्या वाक्यं समाकर्ण्य महादेवो मुदान्वितः ॥ हसन्प्रोवाच भगवान्प्रीयतां प्रीतिपूर्वकं ॥ श्री महादेव उ० ॥ प्रिये न दृष्टमयापि क्षेत्रमाहात्म्यमद्भु
तं ॥ दशाश्वमेधकं पुण्यं लक्ष्यते स्नानमात्रतः ॥ संप्राप्तश्चापि वैदेविधर्मे शर्मापुनर्भवं ॥ दर्शनादेव श्रीदेव्याः संस्थितात्करवीरके ॥ देवीपश्यंति येनि
त्यं करवीरनिवासिनः ॥ नीराजनविधौ नैवेद्यांति विष्णोः परं पदं ॥ मुक्तिहेतुं न रात्र्यक्षो नैवास्ति करवीरके ॥ निरीक्षणं सदा देव्याः सर्वदं सर्वदेहिनां ॥ न
वेदाध्ययनापेक्षा न च षट्दर्शनाश्रमः ॥ न चव्रतं न दानं तु लंने मौनं न तपःश्रमः ॥ सत्कुलप्रसवो नैव न वित्तं न बहुज्ञता ॥ त्रयीप्रोक्तं न कर्मापि नोपदेशो
पि सद्गुरोः ॥ तारकस्योपदेशो हि कोपि युज्येत मामकः ॥ विनैव तेन संप्राप्तो धर्मे शर्मा हरेस्तनुं ॥ वासिनां करवीरे वै मुक्तिद्वारमपावृतं ॥ त्रिकालदर्शनं दे
व्याः भिक्षादानं ततः परं ॥ परमं मुक्तिबीजं वै भक्त्या देव्या निरीक्षणं ॥ तदन्ये भुवने श्वर्ये तृणीकृत्य निरीक्षता ॥ तथाप्युपदिशेद्देवि तत्त्वतुष्ट्यै हितारकं
॥ दृष्ट्वा लक्ष्मी विरूपांकरवीरनिवासिनी ॥ येये तीर्थे स्थिता देवा येये तीर्थे स्थिता द्विजाः ॥ नावमान्याश्चते जातु न च तीर्थफलं स्पृशेः ॥ तत्र तीर्थे स्थिता
न्देवान्द्विजांश्चैवावमान्य च ॥ ये यत्कुर्वंति तीर्थादि तत्सर्वं निष्फलं भवेत् ॥ तस्मात्तां परिपृष्टैवक्ष्यरिष्ये तारकश्रुतिं ॥ मृतानां चैव सर्वेषां करवीरपुरे प्रिये ॥

कर०मा० ॥अगस्त्यउ०॥एवमुक्त्वा विश्वनाथसहदेव्यासुमध्यमे॥गत्वादेवालयं चाथ महालक्ष्मीं प्रणम्य च॥श्रीविष्णुरूपिणीं देवीं तुष्टावश्च यथा
४६ श्रुतं॥गीर्भिः पवित्ररूपाभिस्त्रीमूर्त्तिरूपधारिणीं॥एकं ब्रह्मैव नित्यं त्रिविधमथ ते संनिधानात्सरेशो ब्रह्माविष्णुमहेश्वराभिधमभूत्तत्वादिभिर्वि
हितं॥सा त्वं जानासि सर्वं सकलहृदयगतं सर्वगे सर्वमातः कस्तो तुं त्वां समर्थः स यदतद्हृदये वाग्य तौ वैनिवृत्ता॥दैतेयवृंदसुरवृंदकिरीटकोटि
ज्योतिश्छटानिकरकल्पितरत्नदीपं॥देवी तदीयचरणं शरणं जनानां सेवामहे सकलमंगलवर्धनाय॥उत्फुल्लकैरवदलायतलोचनायै कुंडोल्ल
सच्चटुलकुंडलमंडितायै॥राकाशशांकप्रतिमाननकोमलायै तस्यै नमः कमललोचनवल्लभायै॥सद्भक्तकल्पलतिकां हरकंठभूषां के
यूरहेमकटकोज्वलकंकणांकां॥संसारसागरमुखे पतितस्य जंतोर्देहि त्वदीयकरयष्टिमनंगमानः॥अगस्त्यउ०॥इति स्तुत्वा भगवती
शंभुना विष्णुरूपिणी॥प्राह प्रसादसुमुखी सर्वांतर्यामिणी सदा॥श्रीदेव्युवाच॥महादेव महाशंभो त्वमत्रोपविश प्रभो॥आगच्छान्नपदे दे
वि त्वमप्यत्राविश प्रभो॥समागतौ युवामत्र सर्वलोकहिताय च॥संपूर्णकामयोर्नित्यं न तीर्थागमनस्पृहा॥येषां संस्पर्शनादेव नश्येत्सर्वमघं
कृतं॥न लोकोपकृतेरन्यत्फलं तीर्थेषु दृश्यते॥क्षेत्रे हितार्थं के स्थित्वा यथा लोकाननुनाति च॥तथैव मामके स्थित्वा पुनीहीदं जगत्त्रयं॥त्वं हिम ४६
दक्षिणे भागे नित्यं संतिष्ठ पावन॥त्वन्नाम्ना वै भवेत्क्षेत्रे त्रिषु लोकेषु विश्रुतं॥गयोरोद्गीति वै नित्यं सर्वदं सर्वदेहिनां॥माहात्म्यं तन्न वेदद्रष्टा धृतो

सि मस्तके मया॥तस्मात्सर्वप्रयत्नेन लोकानां मुक्तिहेतवे॥कामानापूर्यैवै पूर्वं तस्माज्जपसुतारकं॥त्वत्पूजामविधायैव ये यत्पूजनतत्पराः॥तेषां
तीर्थफलं नैव भवेत्सर्वं निरर्थकं॥अगस्त्य उवाच॥इति श्रुत्वा महादेवः विश्वनाथः सहोमया॥संस्थितो दक्षिणे भागे देव्या वै भुक्तिमुक्तिदः॥दशा
श्वमेधतीर्थस्य माहात्म्यं कथितं मया॥प्रष्टव्यं यदि चेदन्यदस्ति तत्पृच्छ मत्प्रिये॥नारदउ०॥इति श्रुत्वा महाख्यानं दशाश्वमेधकस्य हि॥सर्वतीर्थपु
रो दृष्ट्वा तत्प्रच्छाथैव पतिं॥लोपामुद्रा उवाच॥पुरः किं दृश्यते स्वामिन्तीर्थं वै महदद्भुतं॥माहात्म्यं तस्य सर्वं हि समाख्याहि पर्ंत शुभां॥नारदउ०॥
इति तस्य प्रश्नसंतुष्टो भगवान्स घटोद्भवः॥माहात्म्यं कथयामास सर्वतीर्थस्य शोभनं॥इति श्रीपद्म० करवीरमाहात्म्ये विश्वनाथवरप्रदानं ना
माष्टादशोध्यायः॥१८॥ ॥अगस्त्य उवाच॥इदं तीर्थवरं देवि सर्वतीर्थमिति श्रुतं॥इदं सर्वेश्वराख्यं वै लिंगं पापप्रणाशनं॥सर्वतीर्थे नरः
स्नात्वा यः पश्येत्तं सदाशिवं॥सर्वेश्वराभिदं सोथ मुच्यते सर्वकिल्बिषैः॥तीर्थकोटित्रयं साधं राहुपर्वणि संगमे॥निरत्याख्ये महातीर्थे स्ना
तुमापाति पावनं॥तदत्र विद्यते नित्यं सर्वतीर्थादिवं निभं॥स्नानदानरतान्नृजंतून्पुनाति महत्तोहसः॥समागताय दादेवाय ज्ञं द्रष्टुं हि पावनं॥
प्रारब्धब्रह्मणाश्रुत्वा मीलिताः सर्व एव हि॥विचारं ते य संचक्रुर्नाना मुनिगणान्विताः॥समागता वयं सर्वे यज्ञं द्रष्टुं च ब्रह्मणः॥क्षेत्रं वै करवीरा
ख्यमिहामुत्रफलप्रदं॥सत्यनंतानि तीर्थानि करवीरपुरे सदा॥लिंगानि चाप्यनंतानि संति दिव्यानि सर्वतः॥कथं तीर्थे विधिः कार्यं कथं कय त्रस

क र० मा० मापनं ॥ संभार्यश्चापि संभार्ये यज्ञार्थं ब्रह्मणोन्वहं ॥ नोचेद्दुत्वा कुपेदस्मान् तीर्थयात्राकृतात्मनः ॥ नोपेक्षाण्यपि तीर्थानि दृष्ट्वा
४७ सर्वार्थदान्यहो ॥ क्षेत्रं प्राप्यार्थयो मूढः स्नानादि न समाचरेत् ॥ कृतं सर्वं निरर्थं स्यात् पापं चापि भवेत्स्वरं ॥ उपेक्ष्या हि नैवे यज्ञः सर्वपा
पप्रणाशनः ॥ अत्माचापि कुपेदस्मात् स्वापं चापि समाश्रयेत् ॥ न पश्यंति महायज्ञं नयत्कुर्वंति सेवनं ॥ ते सर्वे पापकर्माणो यमदंडसमा
प्नुयुः ॥ इति चिंतातुराः सर्वे देवा वै वासवादयः ॥ गुरुं संपूज्य विधिवत्प्रच्छुरिदमादृताः ॥ देवा ऊचुः ॥ गुरो वाचस्पते स्वामिन् शिष्यत्रा
णपरायण ॥ संसारार्णवमग्नानां पोतवत्तारणाय नः ॥ गुरुरेव परं दैवं गुरुरेव महत्तपः ॥ एवं यश्चिंतयेन्नित्यं तस्य सिद्धिः करे स्थि
ता ॥ यस्य साक्षाद्भगवती ज्ञानदीपप्रदे गुरौ ॥ मर्त्यबुद्धिः प्रदेतस्य सर्वं कुंजरशौचवत् ॥ स चक्षुरंधस्य यथाग्रणी तथा जनस्याविदुषो
मतो गुरुः ॥ त्वमर्कदृक् सर्वदृशां समीक्षणो वृतो गुरुः न सुमतिं बभुत्सतां ॥ कथयाशु गुरो स्वामिन् यथा धर्मद्वयं भवेत् ॥ यत्रावै सर्वती
र्थानां यज्ञसंसेवनं तथा ॥ अगस्त्य उ० ॥ ततो गुरुरुवाचेदं विचार्य च पुनः पुनः ॥ देवानां रक्षयन्धर्मं तथा यज्ञसमुद्भवं ॥ गुरुरुवाच ॥ रा मू
अनीय सर्वतीर्थानि तीर्थमेकं प्रकल्पयेत् ॥ तत्र स्नानाद्भवेत्सर्वं प्रत्येकं स्नानजं फलं ॥ एवं कृताद्भवेत्सर्वं धर्मद्वयमनामयं ॥ हितं चा ४७
पि भवेन्नॄणामिहामुत्र फलार्थिनां ॥ अगस्त्य उ० ॥ इति श्रुत्वा वचस्तस्य सर्वे देवाः सवासवाः ॥ आनीय सर्वतीर्थानि त्रैलोक्यांतर्ग

तानि च ॥ पुष्कराद्यानि सर्वाणि करवीरस्थितान्यपि ॥ चक्रुस्तीर्थं महत्तेवै सर्वतीर्थाभिदं परं ॥ सर्वेश्वराभिदं लिंगं दिव्यं संस्थाप्य
ते मुदा ॥ वरं चापि ददुस्तत्र सर्वलोकमनोरमं ॥ सर्वतीर्थे च यः स्नात्वा लिंगं सर्वेश्वराभिदं ॥ पूजयन्विधिवद्भक्त्या ते सर्वे स्वर्गगामिनः ॥
रुद्रेण शतरुद्रेण श्रीरुद्रेण विशेषतः ॥ बिल्वपत्रैः सुगंधैश्च तालपत्रैर्मनोरमैः ॥ मल्लिकाजातिकाद्यैश्च नानाकुसुमजातिभिः ॥ स
र्वेशं यत्र पूज्यंते ते सर्वे पुत्रपौत्रिणः ॥ अस्नात्वा सर्वतीर्थेषु यः कुर्याद्दृष्टतीर्थकं ॥ तस्य सर्वं निरर्थं स्यात्तीर्थयात्रार्जितं फलं ॥ इति
दत्वा वरं तत्र महेंद्रप्रमुखाः सुराः ॥ सर्वतीर्थेषु संस्नात्वा दृष्ट्वा सर्वेश्वरं तथा ॥ यस्यैतेथ सहायं च चक्रिरे ब्रह्मणः प्रिये ॥ तत्तीर्थं पंच
नद्यां वै भावितं विघ्नेन महत् ॥ आनीता या हि यज्ञांते स्नानार्थं तु महर्षिभिः ॥ यत्रैव पंचगंगा वै वहंते पश्चिमामुखी ॥ जयंत्या संगता
यापि तद्भवेत्सर्वतीर्थकं ॥ इयं पंचनदी नित्यं शिवरूपा प्रकीर्तिता ॥ शक्तिरूपा जयंती यं तयोर्योगो हि पुण्यदः ॥ यत्र पंचनदीति संज
यंत्या सह संगता ॥ तस्या यागसमं तीर्थं तत्र सन्निहितो हरिः ॥ न गोमती न वै गंगा न गोदा न च पुष्करं ॥ पश्चिमाभिमुखी चैत्स्यात्संचगं
गातिपावनी ॥ स्वभावतः पवित्रं वै सर्वतीर्थं विशेषतः ॥ तत्रापि पंचगंगा यं जयंत्या संगता परा ॥ पश्चिमावहंते यस्मात्तस्मात्काश्याशताधि
का ॥ सुखं भागीरथी लभ्या सुखं लभ्या च गोमती ॥ गोदा चापि सुखं लभ्या त्वरलभ्या शरयू तथा ॥ न लभ्यं तत्पंचगंगाजयंती संगमे स्थिता ॥

क॰र॰मा॰ सर्वतीर्थोपरिगतावहंते पश्चिमामुखी॥ इयं पंचनदी गंगा नाल्पपुण्यैः प्रलभ्यते॥ संति याम्यां सुतीर्थानि बाणबाणप्रमाणतः॥ पंच
४९ नद्याश्च माहात्म्यं को हि वर्णयितुं प्रभुः॥ अस्ति मांत्रिपतेद्येषां पंचनद्यां स्वभावतः॥ अपि पापात्मनां नित्यं चोरादिष्वातिभस्मनां॥ गतिः सा
जायते येषां या भवेत्सुकृतात्मनां॥ नारद उ॰॥ तस्येति वचनं श्रुत्वा लोपामुद्रा पतिव्रता॥ पप्रच्छ स्वपतिं साध्वी नदहगं मृतयं त्रिता॥ लोपामु
द्रोवाच॥ कथं कस्येह संजाता गतिस्तु हि स्तरात्मना॥ तत्सर्वं कथय स्वामिन्यथावदनुपूर्वतः॥ नारद उवाच॥ इति तत्प्रश्नसंहृष्टो महामु
निरुदारधीः॥ प्रियां प्रोवाच भगवान्घटजन्मा पतिव्रतां॥ अगस्त्य उवाच॥ मरीचावंत्यिमहाक्षेत्रे त्वासील्लुब्धिष्क्रिजाधमः॥ नानापापरतः क्रू
रः पिशुनः कूटसाक्षिणः॥ परनिंदारतः पापआत्मघातिगतत्रयः॥ वेश्यासक्तः स्तु यासाधं भक्षयन्नुधनमर्जितं॥ चौर्यादिना समानी
स्य गृहाद्विहारितं॥ चौर्यवृत्त्या समालब्धं यदा द्रव्यमपूरितं॥ नदा मार्गस्थितः श्वंके मार्गिणां वधमेव सः॥ आश्रितः पर्वतं द्रोणीमार्गिणां
वधकाम्यया॥ व्याघ्रेण भक्षितः सोथ हतो दुर्मरणात्खलः॥ याम्यैर्दूतैर्दृढं बध्वा प्रणीय यातनाग्रहं॥ चक्रुः स्तस्य महाघोरा यातनाः पाप
कारिणः॥ आसीपत्रवने सुच्युकुंभीपाके तथैव च॥ कालसूत्रे दृढं पाच्यं रौरवे मुनिपातितः॥ एवं नयाच्यमानस्य निरयत्त्वापदर्शनः॥ व्या ४९
घ्राधिभक्षितो देहः श्वादिभिर्भक्षितस्तथा॥ गृध्रैर्नीतं चतुर्दिक्षु तस्य मांसं हि यापनः॥ केनचिन्नीयमानांतद्गृध्रेणमुखतश्च्युतं॥ पतितं पं

च गंगायां सास्थिकं पललं क्वचित्॥ तस्य तत्सुकृतं दृष्ट्वा यमः प्रोवाच तान्भटान्॥ आनीय तामरेभ्यो ध्रष्टैरवरुध्यं हितं द्विजं॥ यमस्याथ वचः श्रु
त्वा क्षणदानीयतं द्विजं॥ पुरतस्थापयामासुर्धर्मरूपधरस्य च॥ तावद्दिव्यं विमानं वै घंटाघोषसमुज्वलं॥ दिव्यैर्धूतै समानीय द्विजं तत्रोप
विश्य च॥ नीतो द्विजवरः सोथ यत्र देवः शचीपतिः॥ पंचनद्याश्च माहात्म्यमुक्तं सामान्यतो मया॥ महापापरतः स्तीर्णो द्विजो यत्रास्थि
पाततः॥ तारयेत्स्वतटे जंतुमृतं या यत्र कुत्रचित्॥ सा केन वर्ण्यते देवी पंचगंगाघविनाशनी॥ भागीरथेन यानीता यथा काश्यां तपोब
लात्॥ भागीरथी महाभागा तारयेत्सकं जगत्॥ तथैव करवीराख्यक्षेत्रे पंचनदी परा॥ आनीता स्वर्गदी चैषा ऋषिभिस्तु तपोबलात्॥
भागीरथी स्वरूपेण स्वर्नदी चाचरे यथा॥ पुनाति सकलं लोकमागता काशिकापुरे॥ तथैव दक्षिणे भागे करवीरपुरे शुभे॥ पंचनद्या
स्वरूपेण स्वर्नदी तारयेज्जगत्॥ ६४॥ इति श्रीपद्मपुराणे करवीरमाहात्म्ये अगस्तिलोपामुद्रासंवादे सर्वतीर्थवतीर्थवर्णनं नामैकविं
शोध्यायः॥ २१॥ ॥ नारद उवाच॥ इति तीर्थद्वयं पत्न्यै व्याख्यायाथ महामुनिः॥ समागतो मुनिश्रेष्ठः करवीरपुरं महत्॥ प्रविष्टए
वसं वीक्ष्य स्वं देहलिविनायकं॥ अनुलिप्य तथा भक्त्या पूज्य सिंदूरकर्दमैः॥ निर्विघ्नमोदकान्भक्त्या रक्षयंतं निरंजनं॥ महोपसर्गवर्गेभ्य
स्तेतोनः क्षत्रमाविशत्॥ अगस्त्य दृष्ट्वा मणिकर्णिकां च सकाशिकां स्वर्गतरंगिणीयुतां॥ साक्षीण पुण्येतरपुण्यकर्मणं रूपं गणैः स्थि

क.र०मा० युगणैरिवावृता ॥ संचैलमाप्लुत्य जले स्थले मनो विलंबमालंबितशुद्धबुद्धिः ॥ संतर्प्य देवर्षिमनुष्यदिव्यपितॄंस्तथा स्वानाह्निककर्मकांडवि
४९ त् ॥ आनंदम्यं चैनमणिकर्णिकेशं संपूज्य भक्त्याक्षतगंधपुष्पैः ॥ श्रीकुंडलेशं परया च भक्त्या नत्वाभिवानीशिवसंन्निधौ स्थितां ॥ समागतश्चाथ
मुनिर्महेश्वरं विश्वेश्वरं प्रीतमनाः सतीयुतः ॥ साष्टांगमानम्य जयस्वनान्मुदा कृत्वा बहून्पूजनमारंभे महत् ॥ पंचामृतैश्च सुरसैः पवित्रैः श्री
नारिकेलप्रभैर्वजलैः परैः ॥ गंधोदकैः पुष्पजलैः पवित्रैः संस्नापयामास महेश्वरं सुधीः ॥ रुद्रानुवाकैःशतरुद्रियैस्तथा श्रीरुद्रियैस्तथा श्रीरुद्र
सूक्तैरपि रुद्रलिंगकैः ॥ संस्नाप्य विश्वेश्वरमादिदेवं समर्चयामास तथोपचारैः ॥ सुगंधपंकैरनुलिप्य लिंगं पत्रैश्च बिल्वप्रभवैरने
कधा ॥ सहनामग्रथितैश्च मंत्रैरपूजयद्विश्वमनोहरं हरं ॥ धूपैश्च दीपैश्च तथोपहारैः शाल्यन्नयुक्तैर्वटकैर्घृतप्लुतैः ॥ नानाफलैश्चापि तथा
पवित्रैस्तांबूलयुक्तैः ससुवर्णपुष्पैः ॥ नीराजनैर्दीपयुतैरनेकधा सन्मंत्रपुष्पांजलिभिः प्रपूज्य ॥ पुनः प्रणम्याथ महेश्वरं मुनिस्तुष्टाव भक्तिः
प्रणयेन चेतसा ॥ अगस्त्य उवाच ॥ देव देव जगतां पते विभो गर्भभीमभव चंद्रभूषण ॥ भूतनाथ भवभीतिदारक त्वां नतोस्मि नतवांछितप्रदं ॥ रामू
नीललोहितसमीहितार्थद द्व्येकलोचन विरूपलोचन ॥ व्योमकेश पशुपाशनाशन त्वां नतोस्मि नतवांछितप्रदं ॥ चंद्रचूड मृड धूर्जटे हर ४९
र-त्र्यक्ष रक्ष सततं शांतन ॥ त्रांतत्राश्वत शिवापते शिव त्वां नतोस्मि नतवांछितप्रद ॥ देवदेव शितिकंठ शूलधृक् चंद्रशेखर फणींद्रभूषण ॥

कामदहन पशुपते महेश्वर त्वां नतोस्मि नतवांछितप्रद ॥ शार्वरीरहित शर्व सर्वग स्वर्गमार्गसुखदापवर्गद ॥ अंधकासुररिपोथकपर्दिस्त्वां
नतोस्मि नतवांछितप्रद ॥ त्र्यंबक त्रिपुरसूदन गर्भत्राणकृत्त्रिनयन त्रयीमय ॥ कालकूटदलनांतकांतक त्वां नतोस्मि नतवांछितप्रद ॥ त्रांक
रोग्र गिरिजायनत्रिव विश्वनाथ विधिविष्णुसंस्तुत ॥ वेदवेद्य विदिताखिलेंगित त्वां नतोस्मि नतवांछितप्रद ॥ नारद उवाच ॥ स्तुत्वेत्थं विश्वना
थं वै घटजन्मा महामुनिः ॥ न दर्शनं महानंदान नर्त मुक्तिमंडपे ॥ धन्योहं कृतकृत्योहं मया विश्वेश दर्शनात् ॥ काशीविरहजं दुःखं विस्मृतः कर
वीरके ॥ जय विश्वेश सर्वात्मन्नकरवीरपुरागत ॥ ज्ञातं वै क्षेत्रमाहात्म्यं सर्वज्ञस्त्वं जय प्रभो ॥ मत्प्राणरक्षणं कर्तुमागतः किं पुरे वहि ॥ भक्तवत्सल वि
श्वेश पाहि पाहि कृपानिधे ॥ इति स्तुत्वा महादेवं देव्या दर्शनलालसः ॥ स निर्गतो मुनिश्रेष्ठो देव्याः प्रदक्षिणं ॥ योगतीर्थे सुसंस्नात्वा दृष्ट्वा यो
गेश्वरं तथा ॥ कनकाख्ये महाकुंडे ततः स्नात्वा विधानतः ॥ अप्सरेशं ततो गत्वा गौरं भातीर्थमागतः ॥ स्नात्वा तत्र विधानेन गौरं भां पूज्य भक्तितः ॥
विनायकं ततो नम्य नत्वा च दंडपाणिनं ॥ नत्वा कामाक्षिकां देवीं वाराहीं तदनंतरं ॥ ब्रह्माणं च ततो नत्वा विष्णुं नत्वा ततः परं ॥ शिवं नत्वा ततः स
म्यग्ततो विश्वेश्वरं गतः ॥ कर्कोटेशं नमस्कृत्य तथान्यानपि सर्वशः ॥ दत्तात्रेयमुनेश्चाथ पादुके शं प्रणम्य च ॥ सिद्धविघ्नेश्वरं नत्वा सिंहवाहनमेव च
॥ गरुडं वाहनं देव्याः स्थितं गरुडचत्वरे ॥ नत्वा चैव विधानेन तस्यैव पुरतः स्थिते ॥ देव्याश्च पादुके नत्वा प्रविष्टो मुक्तिमंडपे ॥ देव्याश्चैवांतरं भागमहा

कर० मा० कालीं प्रणम्य च ॥ दक्षिणाभिमुखां देवीमास्थितां सर्वसिद्धिदां ॥ पूजयित्वा विधानेन स्तुतिं चक्रे घटोद्भवः ॥ अगस्त्य उवाच ॥ दैत्यसंहारवक्त्रे त्वां म
५० हामायीं सुरेश्वरीं ॥ श्रीरुद्ररूपिणीं वंदे महाकालीं तमोगुणां ॥ दशवक्त्रां दशभुजां सर्वाभरणभूषितां ॥ श्रीरुद्ररूपिणीं देवीं महाकालीं नमोगुणां
॥ त्रिनेत्रालोचनस्मुक्तास्यामंजनाभां महेश्वरीं ॥ श्रीरुद्ररूपिणीं देवीं महाकालीं तमोगुणां ॥ शंखचक्रगदाशूलखड्गबाणधरां परां ॥ श्रीरुद्ररूपिणीं०
॥ परिघं कार्मुकं शीर्षं भृशुंड्याद्यायुधधारिणीं ॥ श्रीरुद्ररूपिणीं० ॥ नारद उ० ॥ इति स्तुत्वा महाकालीं नत्वा चैव पुनः पुनः ॥ महासरस्वतीं द्रष्टुं ततो गच्छ
न्महामुनिः ॥ दिव्याश्वदक्षिणे भागे स्थितां चैवोत्तरांमुखीं ॥ महासरस्वतीं पूज्य नत्वा सर्वविचक्षणः ॥ महासरस्वतीं देवीं तुष्टावामितविक्रमां ॥ अ
गस्त्य उ० ॥ अक्षमालां कुशधरां वीणापुस्तकधारिणीं ॥ महासरस्वतीं वंदे रजोरूपां विधेस्तनुं ॥ चंद्राननां विशालाक्षीं विद्यादाननतां परां ॥
महासरस्वतीं वंदे रजोरूपां विधेस्तनुं ॥ हंसासनसमारूढां सितचंदनचर्चितां ॥ महासरस्वतीं वंदे० ॥ सर्वसिद्धिप्रदां देवीं कमंडलुधरां परां ॥ महा
सरस्वतीं० ॥ नारद उवाच ॥ महासरस्वतीं स्तुत्वा लक्ष्मीदर्शनलालसः ॥ समागतो महाद्वारं कालवेतालरक्षितं ॥ तौ पूज्य विधिवद्भक्त्या स्तुत्वा राम
नत्वा ततः परं ॥ गर्भागारं महादेव्या विवेशाथ महामुनिः ॥ तत्रापश्यन्महालक्ष्मीमास्थितां पश्चिमामुखीं ॥ दिव्ये सिंहासनवरे ज्वलन्म ५०
णिविभूषिते ॥ चतुर्भुजां महादेवीं गदाखेटादिधारिणीं ॥ भूषयंतीं भूषणानि कुंडलादीन्यनेकधा ॥ दिव्यनूपुरवेषाढ्यां दिव्यांबरधरां परां ॥

मुक्ताहारसमायुक्तां कटिसूत्रविराजितां ॥ दिव्यांगदविभूषाढ्यां किंकिणीजालमंडितां ॥ दिव्यमाल्यांबरधरां दिव्यगंधानुलेपनां ॥ सुस्त
नीं कृशमध्यां तां नितंबवरभूषितां ॥ सूर्यकोटितिरस्कारिनखमंडलमंडितां ॥ ~~सुस्तनीं कृशमध्यां~~ प्रवालरत्नवैडूर्यनीलादिमणिभूषितां
॥ नीराजितां सखीयुक्तं कात्यायिन्याः पृथक् पृथक् ॥ चतुःषष्टीयोगिनीभिः श्चामरं व्यजनादिभिः ॥ सेव्यमानपदांभोजां नीराजनविधौ सदा
॥ सगणैः कालवेतालप्रमुखैर्दूरसेवितां ॥ जयोदयस्वनैर्देवैर्ब्रह्मादिभिरभिष्टुतां ॥ एवंविधां महालक्ष्मीं दृष्ट्वानंदसुनिर्भरः ॥ ननाम भुवि काये
न स्तोत्रमुच्चारयन्मुनिः ॥ अगस्त्य उवाच ॥ नमस्तेस्तु महामाये श्रीपीठसुरपूजिते ॥ शंखचक्रगदाहस्ते महालक्ष्मीर्नमोस्तु ते ॥ सिद्धिबुद्धिकें
नमस्ते गरुडारूढे कोल्हासुरभयंकरी ॥ कौमारी वैष्णवी ब्राह्मी महालक्ष्मीर्नमोस्तु ते ॥ सिद्धिबुद्धिकरे देवी भुक्तिमुक्तिप्रदायिनी ॥ मंत्रमू
र्ते सदानंदे महालक्ष्मीर्नमोस्तु ते ॥ श्वेतांबरधरे देवी रत्नाभरणभूषिते ॥ जगत्स्थिये जगन्नाथे महा० ॥ पद्मासनस्थिते देवि परब्रह्मस्वरू
पिणि ॥ परमहंसे जगत्पूज्ये महाल० ॥ सर्वज्ञे सर्ववरदे सर्वदुःखविनाशिनी ॥ सर्वपापहरे देवि महाल० ॥ आद्यंतरहिते देवि विद्यादिशक्तेत्य
गोचरे योगिनीयोगसंभूते महालक्ष्मी० ॥ स्थूलसूक्ष्म महारौद्रे महाघोरपराक्रमे ॥ महापापहरे देवी महाल० ॥ महालक्ष्म्याष्टकं पुण्यं यः प
ठेद्भुक्तिमुक्तिदं ॥ दुःखदारिद्र्यनिर्मुक्तः सर्वान्कामानवाप्नुयात् ॥ इति नत्वा महालक्ष्मीं पूजाद्रव्ययुतो मुनिः ॥ पूजयामास संप्रीत्या विधिवद्भ

क०र०मा० निपुंगवः॥ पंचामृतैः सुसंस्नाप्य तथा शुद्धोदकैः पृथक्॥ नारिकेलोदकैः स्नाप्य नानापुष्परसैस्तथा॥ अभ्यज्य पंचकैः स्नेहैः कस्तूर्यादि
५१ षुकर्दमैः॥ उष्णत्यस्नापयामास महौषैवारिभिर्मुनिः॥ श्रीसूक्तैर्लक्ष्मिसूक्तैश्च अथासूक्तैर्विशेषतः॥ महाभिषेकं कृतवान् महापुण्यजलै
र्मुनिः॥ दिव्यैस्तथांशुकैः पूज्य चंदनैर्विविधैरपि॥ जातीचंपकमाल्याद्यैः कुसुमैरपि पूज्य च॥ दिव्यैर्धूपैः प्रपूज्याथ रत्नदीपैस्तथैव च॥ नै
वेद्यैर्विविधैर्भक्त्या पूजयामास निर्मितैः॥ शाल्यन्नैर्वटकैः सूपैः घारिकाभिस्तथैव च॥ घृतपक्वैस्तथा चान्यैः पायसैर्विविधैरपि॥ लेह्यैः
पेयैः सचोष्यैश्च संपूज्य विधिवन्मुदा॥ दिव्यकर्पूरसंयुक्तैस्तांबूलैः सुमनोहरैः॥ फलैश्च बहुभिः पूज्य दक्षिणाभिस्तथैव च॥ नीराज
नैरनेकैश्च पूजयित्वा स वै मुनिः॥ सहस्रनामभिश्चैव बिल्वपत्रैः पृथक्पृथक्॥ पूजयामास विधिवल्लक्ष्मीस्तोत्रैः पृथक्पृथक्॥ मार्कंडेय
उवाच॥ येः पूजिता महालक्ष्मीः सहस्रनामभिर्मुने॥ मुनिना तेन तानीह समाख्याहि महामते॥ लद्दर्शनं मुनिश्रेष्ठ सर्वसिद्धिप्रदं मम॥
जातं यत्पूर्वपुण्येन महद्भाग्यं हि मामकं॥ नारद उ०॥ सुगोप्यमपि वक्ष्येहं तवस्नेहान्महामुने॥ दिव्यानामसहस्रं हि भुक्तिमुक्तिप्रदं नृणां॥ राम
यन्नाख्येयं मुनेस्तोत्रं नास्तिकाय शठाय च॥ कथनीयं हि शांताय श्रद्धाभक्तियुताय च॥ यदा देव्या हताः सर्वे महिषाद्या महासुराः॥ त्र ५१
त्सादिभिः कृतं स्तोत्रं तदा संतुष्टमानसैः॥ ब्रह्मणा यत्समाख्यातं कुमाराय मुनेः परं॥ तेन यत्कथितं दिव्यं योगिभिः सर्वसिद्धिदं॥ तदहं सं

प्रवक्ष्यामि देव्यानामसहस्रकं॥ तवस्नेहान्महाभाग तं देहैकमनाः शृणु॥ नारद०॥ सनत्कुमारमासीनं द्वादशादित्यसंन्निभं॥ पप्रच्छुर्योगिनः सर्वे
भुक्तिमुक्तिफलप्रदं॥ योगिन ऊ०॥ भगवन्केन मंत्रेण भुक्तिमुक्तिर्भविष्यति॥ तन्नो ब्रूहि महाभाग प्रसादं कर्तुमर्हसि॥ दारिद्र्यध्वंसनं केन केन वि
द्याविवर्धनं॥ केन वा ब्रह्मविद्याप्तिः केन वा मृत्युनाशनं॥ कथं विद्या कथं सिद्धिः कथं वा सर्वसिद्धयः॥ किमत्र बहुनोक्तेन सर्वसिद्धिः कथं भवेत्॥ तत्स
र्वं ब्रूहि नो देव सर्वज्ञोसि नमोस्तु ते॥ सनत्कुमार उ०॥ साधु पृष्टं महाभागैः सर्वलोकहितार्थिभिः॥ महतामेष धर्मः स्याद्यत्सदार्थरतिः सदा॥ ब्रह्मावि
ष्णुमहादेवैः महालक्ष्मीस्तुतिः परा॥ प्रोक्ता तां कथयिष्यामि दुष्टदारिद्र्यभंजनी॥ श्रीविष्णुरूपिणी देवी भुक्तिमुक्तिप्रदायिनी॥ सर्वकर्ममयी देवी सर्व
स्तुतिपरायणा॥ सर्वकर्मफलप्रोक्ता सर्वजाड्यभयापहा॥ सर्वकर्ममयी देवी चतुर्वर्गफलप्रदा॥ तस्या नामसहस्रं वो भुक्तिमुक्तिफलप्रदं॥ महा
लक्ष्मीर्भवेत्तस्य देवता सर्वसिद्धिदा॥ ऋषिर्ब्रह्मा भवेत्तस्य छंदोनुष्टुप् तथैव च॥ भुक्तिमुक्त्यादिसंप्राप्तौ विनियोगः प्रकीर्तितः॥ ध्यानं तस्याः प्रव
क्ष्यामि सर्वसिद्धिप्रदं नृणां॥ सर्वसिद्धिर्महालक्ष्मीः स्त्रिगुणा परमेश्वरी॥ लक्ष्म्या लक्ष्यस्वरूपा सा व्यापकत्वं व्यवस्थिता॥ मातुलिंगं गदां खेटं पा
नपात्रं च बिभ्रती॥ नागं लिंगं च योनिं च बिभ्रती चैव मूर्धनि॥ स्वर्णाभा दिव्यवर्णा च सर्ववर्णयुता सती॥ सर्वसिद्धा महालक्ष्मीः सर्वचित्तमनोह
रा॥ शांतमादौ तानं चांते मूलं जप्यार्थसिद्धिदं॥ नाम्नामष्टसहस्राख्यं मध्ये स्तत्र मिदं जपेत्॥ इति श्री पद्मपुराणे करवीरमाहात्म्ये विंशोध्यायः॥ ॥

कर० मा० ॥ सनत्कुमार उवाच ॥ महालक्ष्मीर्महाकाली महाकन्या सरस्वती ॥ महासरस्वती देवी भक्तानुग्रहकारिणी ॥ नित्या सरस्वती नित्या नित्यानंदा
५२ निरंजना ॥ नित्यप्रकाशिनी देवी स्वप्रकाशस्वरूपिणी ॥ त्रिपुरा भैरवी नित्या हंसा वागीश्वरी शिवा ॥ वाङ्मात्रा च महारात्रिः कालरात्रिस्त्रिलोच
ना ॥ महाकाली कपालीसा महागौरी त्रिलोचना ॥ काली कराली विक्रांता कामाक्षी कामदा शुभा ॥ चंडिका चंडरूपा च चामुंडा लिंगधारिणी ॥ त्रैलो
क्यविजया देवी त्रैलोक्यविजयोत्तमा ॥ सिद्धलक्ष्मीर्महालक्ष्मीर्मोक्षमार्गप्रदायिनी ॥ उमा भगवती देवी चंडी दाक्षायणी पुरा ॥ प्रत्यंगिरा परा वे
ला लोकमाता हरिप्रिया ॥ पावनी चरमा देवी ब्रह्मविद्याप्रदायिनी ॥ अरूपा बहुरूपा च चिद्रूपानंतरूपिणी ॥ शक्तिदा पुंजिका पंक्तिर्भुक्तिमुक्तिप्र
दांबिका ॥ गायत्री सांख्यसंभूता सावित्री प्रणवामृता ॥ दिवमाता सुरेशानी देवगर्भा त्रिकाधृतिः ॥ सांख्या जातिः क्रिया व्यक्तिः प्रकृतिर्मोहिनी मही
॥ यज्ञविद्या महाविद्या उमा विद्या विभावरी ॥ ज्योतिष्मती महामाता सर्वमंत्रफलप्रदा ॥ दारिद्र्यध्वंसिनी देवी हृदयग्रंथिभेदिनी ॥ सहस्रादि
त्यसंकाशा चंद्रिका चंद्ररूपिणी ॥ अकारादि भकारांता मातृकावर्णरूपिणी ॥ समा शांता च सावित्री गायनी प्रणवाक्षरा ॥ शाकंबरी वैष्णवी रामः
च सर्वदेवनमस्कृता ॥ नवदुर्गा विशालाक्षी करवीरनिवासिनी ॥ कुब्जिका कौलिका शास्त्री वीणापुस्तकधारिणी ॥ सर्वशक्तिस्त्रिशक्तिश्च ब्रह्म ५२
विष्णुशिवात्मिका ॥ इडापिंगलमध्यस्था मृणालतंतुरूपिणी ॥ यज्ञसेना ध्रुवा दीक्षा दक्षिणा सर्वमोहिनी ॥ अष्टांगयोगिनी देवी निर्बिजध्यान

गोचरा ॥ सर्वतीर्थस्थिता सर्वा भूः पर्वतनिवासिनी ॥ वेदशास्त्रब्रह्मरूपा षडंगपदविक्रमा ॥ शिवा धात्री शुभानंदा यज्ञकर्मस्वरूपिणी ॥ व्रतिनां
मौनिका देवी ब्राह्मणी ब्रह्मचारिणी ॥ एकाक्षरपरा तारा तारकाभयभंजनी ॥ ऋतंभरा निराधारा निराकाराधिकाक्षरा ॥ राका च क्रूरभावा च
पूर्णमास्या महाद्युतिः ॥ शिना वाली विशालाक्षी रक्षोघ्नी पुष्टिकारिणी ॥ दुष्टविद्राविणी देवी सर्वोपद्रवनाशिनी ॥ जया च विजया चैव जयं
ती चापराजिता ॥ युद्धा वहा महादेवी सर्वभूतानिवासिनी ॥ अयुता युद्धरूपा च प्रशांता सर्वरूपिणी ॥ समुद्रवसने शानी ब्रह्मांडश्रोणिमेख
ला ॥ पंचवक्त्रा दशभुजा शुद्धस्फटिकसन्निभा ॥ शारदा शांकरी धारा सर्वशस्त्रास्त्रधारिणी ॥ गंगा सरस्वती वेणी यमुना नर्मदा तथा ॥ रक्ता
पीता सिता शर्वा सर्वपर्णा गिरीश्वरी ॥ युवश्च कात्यायनी शुभ्रा संसारार्णवतारिणी ॥ कपिला कर्णिका शोणा मल्लिका नवमल्लिका ॥ कौशिकी
चक्रया देवी सबला चक्रिका स्थिता ॥ सर्वभक्त्यात्मिका पंक्तिर्विभक्तिर्विजयात्मिका ॥ दिग्वासा वनवासा च कवैशिका कमलोद्भवा ॥ श्रीसूक्त
लक्षणा देवी दुर्गासूक्तप्रबोधिनी ॥ श्रद्धा मेधा धृतिः प्रज्ञा धारणा शांतिरेव च ॥ श्रुतिः स्मृतिर्धृतिर्धन्या बधिरा श्री मनस्विनी ॥ विभक्ता वैष्णवी
माया सर्वमायाप्रभंजनी ॥ माहेंद्री मानपुष्टांगी माहेंद्रा तालरूपिणी ॥ भारती कमलाभाषा पद्मा पद्मावती प्रिया ॥ गौतमी गोमती गौरी नर
हंसप्रवाहिणी नारायणी प्रभा धाराजा ह्लादी शंकरात्मिका ॥ व्याघ्रचर्मपरीधाना नागयज्ञोपवीतिनी ॥ निर्मांसा भस्मदिग्धांगी ब्रह्मकंकालरू

क२०मा० पिणी॥विशीर्णाचविशालक्षीछायादेवीसुरेश्वरी॥चित्रघंटास्वनंदाश्रीमालिनीमनुसंभवा॥स्तंभिनीस्तोभिनीवीणाभ्रामिणीवारि
५३ णीकृतिः॥मोहिनीद्वेषिणीघोरा रुणरूपिणी॥रुद्रैकादशिनीपुण्याकल्याणीलाभकारिणी॥देवदूतीमहादूतीस्वप्नदुर्गाष्टभैरवी॥
सूर्यचंद्रार्धमात्रासाग्रहनक्षत्ररूपिणी॥बिंदुनादकलातीताबिंदुनादकलात्मिका॥उद्यानादुर्जयाकाराकलाषोडशसंयुता॥काश्यपी
कमलादेवीनाभिचक्रनिवासिनी॥हृदाधारस्थितागुह्यदेविकाचक्ररूपिणी॥आदित्याशार्वरीशुभ्राशंभासुरनिबर्हिणी॥त्रिशिखा
विशिखाशुभ्राकर्मनिर्मूलकारिणी॥आदिलक्ष्मीर्गुणाधाराशुद्धब्रह्मात्मिकाबला॥कृतब्रह्मसुखाधारासर्वचित्रस्वरूपिणी॥मृतसं
जीविनीदेवीकामिनीकामवर्जिता॥निर्वाणभाग्यदादेवीहंसिकाकौशिकीक्षमा॥अविद्यागुणिनीवेदानिर्गुणाखंडितासदा॥सौमिनी
देवबीजाख्याशबलानक्षधारिणी॥दंडिनीमुंडिनीव्याघ्रीशंखिनीसोमसंमता॥सौत्रामणीसदानंदापंचबाणप्रभंजनी॥बाणाशो
कसहस्राक्षीसहस्रभुजपादुका॥संध्यावलीत्रिसंध्याख्याब्रह्मांडमतिरूपिणी॥राज्ञिकारत्नमालाचकामधेनुर्गुरुक्रमा॥चिंतामणी रामु
रूपादेवीकर्णिकास्वर्णभूषणा॥अश्वत्थावारुणीसेनाकाशिकाकामभंजनी॥पंचप्रणवरूपाख्याकांताकाम्यतरानसा॥मंत्रब्राह्मणविद्या ५३
चनादरूपाहविष्मती॥अथर्वणाश्रुतिःशून्याकल्पनावर्जितासती॥सज्ञोस्येनीप्रमामैत्रीप्रकृतिःपार्वणासती॥अवर्णापंचवर्णाचसुवर्णा

भुवनेश्वरी॥त्रैलोक्यमोहिनीविद्यासर्वाधाराक्षरेश्वरी॥हिरण्यवर्णाहरिणीसर्वोपद्रवभंजिनी॥कैवल्यपदवीरेखासूर्यमंडलसंस्थिता॥
सर्वसिद्धांतमार्गस्थावर्णावर्णविवर्जिता॥शान्तरूपासंहरंतीसर्वसंहारकारिणी॥चक्रिकाचक्रमार्गस्थाचक्रमार्गप्रवर्तिनी॥कौलिकीचक्रकेशी
चपक्षिणीपंक्तिपावनी॥सुलभापौरुषीपुष्टिःसर्वसत्त्वप्रसूतिका॥अर्धनारीश्वरीदेवीसर्वविद्याप्रदायिनी॥पार्वतीपौरुषीविद्यासर्वोपनिषदास्थि
ता॥त्रिकालदानदाशांतानंदिनीकमलासना॥रक्षाशांतिवृथादेवीगंधर्वागंधवाहिनी॥अचिंत्यलक्षणागोत्रीनामजात्यादिवर्जिता॥सप्तमात्राप
रिछिन्नाकैवल्यज्ञानदीपिका॥व्योमकेशाखिलाधारापंचकोशविलक्षणा॥पंचकोशात्मिकादेवीपरब्रह्मात्मिकाशुभा॥जयाजराजयंतीचलोकमा
ताप्रसूतिका॥वाग्देवीभारणाकांतासर्वसामान्यसंस्थिता॥अष्टांगाचचतुःषष्टीगणिकाविद्ययार्जिता॥कालिंगीकर्षणाश्यामापक्षिणीकिंनरेश्वरी॥
केतकीमल्लिकाशोणावाराहीचधराधरा॥नारसिंहीमहाग्रास्याभक्तानांमृत्युनाशिनी॥अंतर्बहिःस्थितालक्ष्मीजरामरणनाशिनी॥त्रियंब
कामहामारीसोमसूर्याग्निलोचना॥अदितिर्देवमाताचसुमित्राचसुयोनिका॥अष्टप्रकृतिरिष्टाचविभ्रष्टाविकृतिःकृतिः॥दुर्भिक्षध्वंसिनी
देवीसीतासत्यस्वरूपिणी॥ख्यातिश्चभार्गवीदेवीदेवयानातपस्विनी॥शाकंभरीमहाघोरागरुडोपरिसंस्थिता॥शिवस्थाव्याघ्रपादेवीवा
युवेगातिशीघ्रया॥अकारादिक्षकारांतासर्वविद्याधिदेवता॥मंत्रव्याकरणाकाराज्योतिःशास्त्रस्वरूपिणी॥इडापिंगलमध्यस्थासुषुम्ना

क०र०मा० नाडिभेदिनी॥ कालचक्रप्रयुक्तास्याकालचक्रप्रवर्त्तिनी॥ वैशारदी मतिर्ज्येष्ठा श्रेष्ठा वै सर्वदीपिका॥ वैनायकी वरारोहा श्रोणी मोली च ब
५४ र्बरा॥ जृंभिणी जृंभिणी जृंभागणिकापरा --- ॥ श्वरभा चंद्रिकानंदा सर्वव्याधिप्रभेषजा॥ देवकी देवसंकाशा वारिधिः करुणाकरा॥ शांभ
वी सर्वसंपन्ना सा सर्वपापप्रभंजिनी॥ एकमात्रा द्विमात्रा च त्रिमात्रा च तथापरा॥ अर्धमात्रा तथा सूक्ष्मा स्वगम्या च तथापरा॥ एकवीरा विशे
षाख्या षड्गो मथनि स्तिनी॥ निष्कम्या निष्कला लोका ज्ञानकर्मात्मिका गुणा॥ सुसांद्रानंदसंदोहा व्योमकेशा निरूपिणी॥ गद्यपद्यात्मिका
वाणी सर्वालंकारसंयुता॥ साम वेद पदन्यासा संस्कृता सत्कृतांबरा॥ षट्कर्क कर्कशाकारा सर्वतर्क विवर्जिता॥ आदित्यवर्णा स्वर्णाभा तप
सः परूपिणी॥ ब्रह्मण्या ब्रह्मसंताना वासवत्या जनेश्वरी॥ पुराणं न्यायमीमांसा धर्मशास्त्रागमिश्रिता॥ विदा वेदवती सर्वा हंसविद्या
धिदेवता॥ विश्वेश्वरी जगद्धात्री जगन्निर्वाणकारिणी॥ नारायणी महादेवी सर्वसत्वप्रवर्धिनी॥ हिरण्याबहुरूपा सा हिरण्यपदसंभवा॥
कैवल्यपदवी पुण्या कैवल्यपदगोचरा॥ ब्रह्मसंपत्तिरूपा सा हिरण्यपदसंभवा॥ भरणाचरणाधारा सर्वलोकप्रवर्तिका॥ एकाक्षरपरायुक्ता राघ
सर्वदोषप्रभंजनी॥ पाशांकुशधरा देवी वीणावादाक्षसूत्रिका॥ कपालिनी महादंष्ट्रा भृकुटी कुटिलानना॥ एकमूर्तिस्त्रयीधारा मधुकैटभभं ५४
जिनी॥ सर्वावासा सुवासा श्च बृहती जगती समा॥ छंदस्त्रिष्टुप् प्रतिष्ठा च कल्याणी रक्षणात्मिका॥ शिल्पविद्याश्रया देवी सर्वतोभद्र

कारिणी॥ अचिंत्यलक्षणा त्या भासि सूत्रभाष्यनिबंधिनी॥ सर्वविद्यार्थसंपत्तिः सर्वशास्त्रार्थमातृका॥ अकारादिक्षकारांता मातृकाच
लिपिक्रिया॥ स्वाहा स्वधा स्वरूपा च स्तोत्राक्षरनिरूपिता॥ त्रयी विद्या सदानंदा त्रयी विद्या सदाशिवा॥ सर्वज्ञा सर्वसाक्षी च प्रसन्ना च चराचरा
॥ अणिमादिगुणोपेता परा काष्ठा परागतिः॥ हंसयुक्तविमानस्था हंसरूढा शशिप्रभा॥ भवानी वासना वित्तिः प्रकृतिः कामला मला॥ तंत्री तंद्री
विचित्रांगी व्योमगंगा बलिप्रिया॥ वारुणी वारुणी विश्या ऋग्यजुः साम रूपिणी॥ महानद नदी पुण्या गंगा पुंण्यांगनाश्रया॥ समाधिर्धारणा ध्ये
या श्रोतव्या श्रोत्रियाघृणिः॥ रामप्रिया महादेवी त्युप सर्गाभुजा रुणा॥ निपाता रुंधती जंघा सर्वमाता विशोषणी॥ आसीना च शयाना च तिष्ठती
धावती ति च॥ लक्ष्मीरलक्ष्मी रूपा च स्वरूपा गणिकाकृतिः॥ एकरूपा तपो रूपा सुरूपा च तथाकृतिः॥ समास तद्धिताकारा विभक्तिर्व्यंजनात्मिका॥ स्व
राकारा निराकारा स्त्रियो स्त्रिविशेषिता॥ गंभीरा गहना गुह्या योगलिंगा गधारिणी॥ शेषवासुकि विश्रांता ब्रह्मांडफल चंचला॥ करुणारस
संपत्तिः कीलका मंत्रकीलका॥ शक्ति बीजात्मिका शर्वा मंत्रा मंत्रफलात्मिका॥ आग्नेयी पार्थिवी वायवी वारुणी व्योमकीतनुः॥ सत्यज्ञानात्मिका
नंता ब्राह्मी देवी सनातनी॥ अविद्यावासिनी माया प्रकृतिर्मोहिनीति च॥ शक्तिराधारशक्तिश्च चिछक्तिश्चानिशक्तिया॥ वक्रा रौद्री महामारी मानी
वीमानरूपिणी॥ वीरा विराजमार्गस्था सर्वमार्गप्रदायिनी॥ त्रिकालज्ञानसंतानात्रिकालज्ञानदायिनी॥ जाड्यापहा मृडानी च भवानी भवभंजनी॥

क० मा० नानाशक्तिः स्मृतिः प्रज्ञा धात्री देवी त्रिलोचना ॥ परचित्तविधानज्ञा विशेषगुणसंश्रया ॥ हिरण्यकेशिनी देवी ब्रह्मसूत्रविचक्ष
५५ णा ॥ एकाद्ययुतपर्यंतावर्णमात्रात्मिका परा ॥ मधुप्रज्ञा मधुमती मधुनासा मधुप्रिया ॥ माध्वी देवी महाभागा स्निग्धांगी चतरस्नि
नी ॥ ब्रह्मविष्णुशिवमध्येया ध्यातव्या च विशेषतः ॥ नाभौ वह्निशिखाकारा ललाटे चंद्रसन्निभा ॥ भ्रूमध्ये भास्कराकारा मुंडके हृद
दि स्थिता ॥ कूलिकाधुंदुसंस्थाना काशिकामात्मिकात्मिका ॥ विद्याविद्यात्मिका देवी पंचभूतात्मिकाक्षया ॥ सर्वमंत्राक्षराबीजा स
र्वकामप्रदायिनी ॥ ब्रह्मांडगर्भिणी देवी सप्तावरणमातृका ॥ वैराजपुरुषा भद्रा कुमारी कुलिशात्मिका ॥ अचला विचला देवी शि
वदूती शिवात्मिका ॥ हिमसंध्यादिसंस्थाना कावेरी रश्मिसंस्थितिः ॥ योगनिद्रा महानिद्रा वनिता राजतप्रिया ॥ द्वासुपर्णाभिधा
रंगा सर्वकामार्थदायिनी ॥ अजपानामया विद्या महालक्ष्मी सरस्वती ॥ प्रासादेकाक्षरा देवी जीवंजीवितमातृका ॥ आसुरी राक्षसी
देकल्याणी कल्पनाकृतिः ॥ पंचसामात्मिका देकी सप्तसामात्मिका तथा ॥ उद्गीथापासनारूपायं चाग्निविद्यसाकृतिः ॥ त्रेताग्नि
चिह्नाचापि सर्वविद्येश्वरी तथा ॥ भक्तिलभ्या महादेवी ज्ञाननापि विशेषतः ॥ विद्याशास्त्रप्रदा देवी ज्ञानेनापि विशेषतः ॥ सर्व ५५
रक्षा महामाया ऋषिदेवनमस्कृता ॥ अष्टाष्टकमहारूपा प्रत्यक्षातिप्रमात्मका ॥ वेदशास्त्रप्रदा देवी ज्ञानेनापि विशेषतः ॥ विदशा

स्त्रप्रमा देवी मिथ्याप्रपंचवादिनी ॥ सत्यप्रपंचवादाख्या विशोका शोकनाशिनी ॥ भौतिका भूतसूक्ष्माद्यात्याधिभूतादिदेवता ॥ अपि
ब्धो दधिपंचाख्या पंचाख्या पंचसंहिता ॥ उद्गाहिणी कलावेद्या चेतना चित्तरंजिनी ॥ एकसंख्या परार्धांता संख्यासंख्येयरूपिणी ॥ समुद्रध्यो
ममध्यस्था व्योमबुद्धिसमाश्रिता ॥ वीणा सरस्वती देवी वैष्णवी विष्णुसंभवा ॥ वलित्रयसमायुक्ता भारती भरताश्रया ॥ शब्दब्रह्मात्मिका
देवी ज्ञानब्रह्मपरात्मिका ॥ ज्ञानब्रह्मेश्वरी देवी ब्रह्मकैवल्यरूपिणी ॥ कालिकेयी महारावा महोदधिजलाश्रया ॥ वाडवाग्निमुखा देवी
योगिनी योगदायिनी ॥ महाभूता महामाया महाविद्याप्रदायिनी ॥ पंचभूतमहाग्रासी पंचभूताधिदेवता ॥ सर्वप्रमाणसंपत्तिः सर्व
पदनिवारिणी ॥ ब्रह्मांडबहिरंतस्था वर्णमात्राधिदेवता ॥ महामाता महाभोल्की मंगला च समाश्रया ॥ आर्या शिवकरा देवी प्रवरा व
रहेतुकी ॥ हेतुकी हेतुमाला च त्रिशिखा पंचलोचना ॥ सर्वांगसमदाचारा मन्युहास्यपरंपरा ॥ गीता गाथा च चंद्राभा सर्वोत्तज्योतिरू
पिणी ॥ सामीका सामगा सामी वीरभद्राजनाश्रया ॥ जीवयंती महातारा रावणी तरणी हिंसा ॥ ज्योतिश्चक्रसमा सौमा सूर्याग्निसन्नि
भा तथा ॥ अर्द्धचंद्रोल्लसद्दंष्ट्रा ब्रह्मार्कवह्निसंस्तुता ॥ सप्तजिह्वा महाजिह्वा महापापप्रभंजिनी ॥ महोत्सा च महोत्साह महाभक्ता

धिदेवता॥ भुवनज्ञानसंपन्ना भवनाकारसंयमा॥ शाश्वता शाश्वती लीला लोकानुग्रहकारिणी॥ सरसी मानसी हंसी हंसलोकप्र
दायिनी॥ योगमुद्राकराबंधा भानुकोटिसमप्रभा॥ लोकपुण्या महोरेवा हीष्टकाद्याधिहारिणी॥ सर्वसंकरदोषघ्ना ग्रहोपद्रवनाशिनी
॥ कलिदुःखप्रशमनी दृहद्दारिद्र्यभंजिनी॥ सर्वदेवनिवासाख्या भ्रामरी भ्रमरस्वना॥ यक्षिणी डाकिनी देवी ग्रहकलिविभंजिनी॥ का
किनी लाकिनी चैषा षडाधाराधिदेवता॥ गोणि कालाक्षिणी मुख्या जाघन्यानृतवर्जिता॥ अविद्या यावनी माया चेतनाचित्तरंजिनी॥
वासवी वसुरूपा सा दिव्यरूपपरिच्छदा॥ छंदसी छंदरूपा सा मंत्रस्वछंदभैरवी॥ नरमाला नराभांसी निःशेषग्रहरूपिणी॥ सदानंदा सदाकारा
निष्प्रपंचा निराश्रया॥ सत्ता राध्या रमारामा रमणी मृत्युभंजिनी॥ ज्येष्ठा काष्ठा धनिष्ठा च लक्ष्मी गर्गा गुणाश्रया॥ मैत्रेयी मित्रविंदा च शेषाशि
वकलाश्रया॥ वाराणस्यां स्थिता देवी मृत्युं तत्रैव यच्छति॥ अंतर्बहिर्वारणसी दायिनी दानशालिनी॥ सर्वज्ञानमयी देवी सत्यज्ञानमयी शुभा॥
उत्पत्तिस्थितिसंहारहेतुरूपा जयेच्च॥ नमस्तेस्तु महादेवी नमस्तेस्तु महेश्वरी॥ नमस्ते सर्ववेदानां मातर्नित्यं त्रिविक्षिणी॥ सर्वज्ञे सर्वजन ५६
नी सर्वभक्तार्तिभंजनी॥ सिद्धलक्ष्मी महाकाली महालक्ष्मीर्नमोस्तु ते॥ सद्योजातादिपंचाग्निरूपे पंचकपंचके॥ सिद्धलक्ष्मी महाकाली०॥ ऋग्य

जुःसामवेदाख्ये ब्रह्मविष्णुशिवात्मिके॥ सिद्धलक्ष्मी महाकाली०॥ शब्दब्रह्ममये ब्रह्मात्मि पंचभूतात्मिके परे॥ सिद्धलक्ष्मीर्महाकाली महा०॥
पंचपंचात्मिके भूतपंचेंद्रियविवर्जिते॥ सिद्धलक्ष्मीर्महाकाली०॥ सत्यज्ञानात्मिके नंते नित्यानंदप्रदे शिवे॥ सिद्धलक्ष्मीर्म०॥ स्वयंप्रकाशानित्या
ख्ये प्रकाशाकालरूपिणी॥ सिद्धलक्ष्मीर्म०॥ सृष्ट्यादिकारिणी देवि स्तुसत्यादिप्रभेदिनी॥ सिद्धलक्ष्मीर्म०॥ शांकरी वैष्णवी ब्राह्मी मूलप्रकृतिरीश्व
री॥ सिद्धलक्ष्मीर्म०॥ सद्योजाते वामदेवे अघोरे पुरुषे निशि॥ सिद्धलक्ष्मीर्म०॥ अविद्यापटलध्वंसि विद्याद्वयविनाशिनी॥ सिद्धलक्ष्मी०॥ नवकोटिस्व
ने भावे चामुंडे परमेश्वरी॥ सिद्धलक्ष्मी०॥ अष्टादशकोटिभेदे वैष्णवी लोकधारिणी॥ सिद्धलक्ष्मी०॥ अनंतकोटिभेदे वि ब्राह्मी देवीति कीर्त्यते॥ सिद्ध
लक्ष्मी०॥ लक्ष्यलक्ष्यस्वरूपेयं व्यापकत्वं व्यवस्थिता॥ सिद्धलक्ष्मी०॥ परमात्मा यथा तद्वदेकैव विविधा स्थिता॥ सिद्धलक्ष्मी०॥ प्रयोजनवशा
द्भुक्तिकैवल्यविधिदा स्थिता॥ सिद्धलक्ष्मी०॥ सर्वमंगलमांगल्ये त्रिवेनारायणप्रिये॥ सिद्धलक्ष्मी०॥ दुष्टविद्राविणी देवी दुष्टदारिद्र्यभंजनी
॥ सिद्धलक्ष्मी०॥ उमे देवी नमस्तेस्तु देवि प्रणवसंस्थिते॥ सिद्धलक्ष्मी०॥ सनत्कुमार उ०॥ एवं स्तुता महालक्ष्मीः श्रीसूक्तेनापि संस्तुते॥ हि
रण्यवर्णामित्यादि श्रीसूक्तेनापि पूजिते॥ एवं स्तुता महालक्ष्मी ब्रह्मविष्णुमहेश्वरान्॥ प्राह गंभीरया वाचा दर्शयंती स्वकां तनुं॥ श्रीदे

क०मा० ब्युवाच॥श्रुणुध्वंदेवदेवेशाब्रह्मविष्णुमहेश्वराः॥वरंददामित्टसाहंस्तवेनानेनकांक्षितं॥दिवाऊचुः॥आद्यासर्वोपरास्माकंत्वंतथैव
५८ महेश्वरी॥उत्पत्तिस्थितिसंहारहेतुभूतापराश्रया॥अभिन्नरूपमस्माकंईश्वरेणमहास्तुते॥अयमेववरोस्माकंईश्वराभेदलक्षणः॥
सनश्चास्तुमहालक्ष्मीकिमन्येनवरेणनः॥पठतांश्टण्वतांस्तोत्रंवरमेतंप्रयच्छच॥दुष्टविद्रावणंचैवदुष्टदारिद्र्यभंजनं॥आयुष्यंत्व
तथारोग्यंसर्वोपद्रिनिवारणं॥अणिमादिगुणैश्वर्यंजातिस्मरणमेवच॥वाराणस्यांचमरणंस्वछंदमरणंतथा॥सर्वज्ञत्वंतथाभ
क्तिवीतरागीत्वमेवच॥स्वाराज्यायुष्यमर्यादोवैराज्यपदवीतथा॥ईषणात्रयनिर्मुक्तिःसाम्राज्यपदवीतथा॥किमत्रबहुनोक्तेनतारक
ब्रह्मणःपरं॥उपदेशंतुदेवत्रिप्रसादंकर्तुमर्हसि॥सनत्कुमारउ०॥एवंहिसंस्तुतांदेवीमहालक्ष्मीमहेश्वरी॥त्रिमूर्त्तिशक्तिरूपेणक
नकांबरधारिणी॥क्षणादंतर्हितादेवीत्रयाणामेवपश्यतां॥अपियूयंमहाभागायोगिनःशांत्यमानसाः॥नामाष्टकसहस्रंचैजप राम
ध्वंसार्वकालिकं॥दारिद्र्यभयरोगश्चनश्यतेनात्रसंशयः॥अष्टम्यांचचतुर्दश्यांनवम्यांचव्रतेस्थितः॥पौर्णमास्याममावास्याविशे ५८
षेणप्रकीर्तयेत्॥सर्वान्कामानवाप्नोतियोनित्यंप्रयतःपठेत्॥शतमादौशतेचांतेमूलंजप्त्वापठेदिदं॥दिव्यानामसहस्रंवैभुक्तिमुक्तिप्र

लप्रदं॥मूलमंत्रंकथिष्यामिसुगोप्यमपिवैमुने॥अष्टमात्स्वथमंचैवसप्तमाद्बुद्वितीयकं॥अथर्वस्वरसंयुक्तंस्वकलानादभूषितं॥एत
त्पिंडीकृतंबीजंमहालक्ष्म्याभिधानकं॥आदौपिंडीकृतंबीजंविनिक्षिप्यततःपरं॥महालक्ष्मीपदंचैवचतुर्थ्यंतंसमुच्चरेत्॥पुनरंतेचह्री
जंनमःपल्लवसंयुतं॥शिरोयुक्तंजपेन्मत्रंमूर्त्तिध्यानमन्वितं॥कृत्वाचादौपुनश्चर्योसहस्रंतुत्रयोदश॥मंत्रेणानेनयःस्तोत्रंसंपुटीकृत्य
यःपठेत्॥सकामःसकलान्कामान्निष्कामोमोक्षमाप्नुयात्॥अष्टोत्तरशतंचापिनित्यंमंत्रंजपेन्नरः॥छंदस्त्रिष्टुपूऋषिर्ब्रह्मामहालक्ष्मी
र्देवता॥बीजेनाद्येनवैन्यासंप्रकुर्वीतयथाविधि॥षट्पल्लवयुतानेवत्हृदयादिषडंगकं॥अरिमित्रादिदोषोपिनास्त्यत्रमुनिपुंगव॥
सिद्धमंत्रमिमंप्राहुस्सनकादिमुनीश्वराः॥गुरोर्मुखात्स्वलक्ष्येतनान्यथासफलंभवेत्॥सप्तजन्मनिदारिद्र्यंस्तोत्रपाठाद्विनश्यति॥कु
लेनजायंतेतस्यदारिद्र्यंकलहादिकं॥महापातकसंभूताव्याधयश्चापिदारुणाः॥नश्यंतिसकलास्तस्यस्तोत्रपाठरतस्यच॥महा
लक्ष्म्यामहादेव्यानाम्नामष्टसहस्रकं॥सर्वसंपत्प्रदंचेदंब्रह्मणारचितंपुरा॥यस्येदंपुस्तकंगेहेतिष्ठेलक्ष्मीसदाध्रुवं॥नतत्राग्निभयं
घोरंसर्वचोरादिकंतथा॥यश्चैतत्पूजयेन्नित्यंभक्त्यावैपुस्तकंबुधः॥तस्यतुष्टंभवेन्नित्यंत्रैलोक्यंसचराचरं॥जायंतेपशवःपुत्राध


LIBRARY
UNIVERSITY
PENNSYLVANIA

LIBRARY
UNIVERSITY
PENNSYLVANIA